कारान्तं तद्वत्।। ॥छ॥ इति हलन्ताः स्त्रीलिंगाः॥ स्वमोर्लुक्। अदत्वं। स्वनडुह्। त्वाद्। स्वनडुही। वक्तरनडुहोरि

त्याम्। स्वनडुंहि। पुनः स्वनडुद्वांवी षं पुंवत्। वाः वारी। अन फलं तत्त्वान्न नुम्। वारि। चत्वारि। रलुमतेति

कादेशो न। किं के कानि। इदं इमे इमानि। अन्वादेशे। इदमेतदोर्नपुंसके द्वितीयैकवचने एनदिति

। वा। एनत्। एने। एनानि। शेषं पुंवत्। ब्रह्म। संबुद्धौ वा नपुंसकानां नलोपो वाच्यः। हे ब्रह्म। हे ब्रह्मन्।

ब्रह्मणी। ब्रह्माणि इत्यादि। अहन्। अहन् नित्यं रुत्वं स्यात् पदान्ते। रुत्वस्यासिद्धत्वेन नलोपो न। अहो। अह्नो

नलोपप्रतिषेधे व्यक्तव्यः। अहः। विभाषा ङिश्योः। अह्नी। अहनी। अहानि। हे अहः। अहोभ्यां। अहःसु। दाऽ।

॥ऊ॥

दंडिनी। इन्हन्पूषार्यम्णां शौ। एषामंगानामुपधाया दीर्घः स्यात्। शौ परे। दंडीनि। रबकू

हत्रहाणि। बकूपूषाणि। रबकार्यमाणि। असृजः पदांते ऊत्वं। सृजेः क्विनो विधानादि

दिश्यसृगादौ प्रतिषिद्धं। असृक्। असृजी। असृंजि। पदं न इति वा असंन्। असानि।

असृजा। असृजा। असृक्ष्यां। असृग्भ्यामित्यादि। ऊर्क्। ऊर्जी। ऊर्जि नृशौ नुमू वेति केचि

त्। ऊर्जि। ऊंजी। रबकूर्जि नुम् प्रतिषेधः। बकूर्जि। ऊर्जानि। अर्थात् सर्वनुम् मिछंत्ये

को। बकूर्ज्जि। यत्। येत्यानि। रतत्। ते तानि। रयत्। येयानि। र एतत्। एते। एतानि। अन्वा

देशेतु। नपुंसके द्वितीयेकवचने एनदिति वाच्यं। एनत्। एने। एनानि। गवाक्। न संज्ञायां।

अकारस्लोपः। गोची। गवां चि। तिर्यक्। तिरश्ची। तिर्यंचि। एवं परो। यत्कृत्। यकृती। यकृंति। प

दं। नितिवाय कत्। यकानि। यकृता। यक्ना। यकृभ्यां। यकन्भ्यां। शकृत्। शकृती। शकृंति। शका

नि। शकृता। शक्ना। शकृभ्यां। शकभ्यामित्या। ददत्। ददती। ठवा नपुंसकस्य। अन्यस्ताकी।

५४

१२

वा। परस्य शतुर्नुम्वा स्यात्। सर्वनामस्थाने। ददंति। ददति। एवं जक्षत्। जक्षौ। यदादयः। तुदन्त्।

त्। आच्छीनद्योर्नुम्। अवर्णान्तात्परस्य शतुर्नुम्वा स्यात्। शीनद्योः परयोः। तुदंती।

तुदती। तुदंति। २ नात्। नांती। नाती। नांति। २ पचत्। [illegible] शप्श्यनोर्नित्यं। शप्श्यनोः प

रस्य शतुर्नित्यं नुम् स्यात्। शीनद्योः परयोः। पचत्। पचंती। पचंति। दीव्यत्। दीव्यंती।

दीव्यंति। २। स्वप्। स्वपी। अप्तृन्निति दीर्घः। स्वांपि। स्वपा। अपो भि। स्वब्भ्यामित्यादि। कत्वं।

धनुः। धनुषी। नुम्। सांतमहत इति दीर्घः। नुम्विसर्जनीयेति षत्वं। धनूंषि। धनुषा।

धनुषा। धनुर्भ्यामित्यादि। एवं हविः। पयः। पयसी। पयांसि। २ पयसा। पयोभ्या

मित्यादि। पेचिवत्। हृ। पेचुषी। पेचिवांसि। २ जगन्वत्। जग्मुषी। जगन्वांसि। २। ज

घन्वत्। जघ्नुषी। जघन्वांसि। २। विद्वत्। विदुषी। विद्वांसि। शेषं पुंवत्। अदः। विन

क्रिकायी। उच्चमत्वे। अमू। अमूनि। चोषंपुंवत्॥ इति हलंतानपुंसकलिंगाः॥ ॥ स्वरा
दिनिपातमव्ययं। स्वरादयो निपाताश्चाव्ययसंज्ञानि स्युः। दतू। आरे। अत्तः। अनादरे।
कारिका। अंगीकारे। स्वर्। अंतर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋध
क्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायं। चिरं। मनाक्। ईषत्।
जोषं। तूष्णीं। बहिस्। अवस्। समया। निकषा। स्वयं। वृथा। नक्तं। नञ्। हेतौ। इद्धा। अद्धा। सामि।
वत्तत्यर्यंतश्च। ब्राह्मणवत्। त्रियवत्। सनात्। उपधा। सनातात्। तिरस्। अंतरेण। अंतरा।
ज्योक्। कं। शं। सहसा। विना। नाना। स्वस्ति। स्वधा। अलं। वषट्। अन्यत्। अस्ति। उपांशु।
क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्। मुहुस्। प्रवाहुकं।
अवहिकं। आर्यहलं। अभीक्ष्णं। साकं। सार्धं। नमस्। हिरुक्। धिक्। असस्। आदि स्तेछित

५५

एधाच् पर्यंतः। कृत्वसुच्। सुच्। शस्तसी। आच्। थाल्। थमुँ। एते प्रत्ययाः।
अथ। प्रतान्। प्रतान्। प्रशान्। मा। माङ्। इति स्वरादिः। च। वा। ह। अह। एवं। नूनं।
शश्वत्। कूपं। कुवित्। नेत्। चेत्। चण्। कच्चित्। यत्र। न। ह। हंत। माकिं। नकिं।
माङ्। नञ्। यावत्। तावत्। त्वै। रै। श्रौषट्। वौषट्। स्वाहा। स्वधा। ॐ। तथा। हि। खलु। किल। तथा। अथ। स्म। अस्मि। अ। इ। उ। ऋ। ऌ। एऐ। ओ। औ। आङ्। अम। मा।
नोतः। प्रतिषेधे। उत। उकञ्। आहह। अतं कं। वेलायां। मात्रयां। यथा। किं। यत्।
यं। ह। हे। है। पाट्। याट्। आहो। अपो। ननु। मन्ये। नहि। उता। हो। अमि। ब्रूहि। न
नु। इति। इव। उपस्थ। वषट्। यदि। द। हो। इहि। इद्। तत। अहो। स्विद्। उपसि। सि कं।
संहिकं। सुकं। शुकं। अनुकं। नहिकं। सत्यं। ऋतं। नोचेत्। नचेत्। जातु। कथं। कुतः।

कच्चा। अत्र। अवाह। हे। है। हा। इत्यादयो व द्वादिष्वा। पञ्चु। सह। अमा। हुषट्। भाज। कु। अंग। स्वा। कु।
अरे। वड। वाड। ऊं। ओं। ह्रुं। खुं। वै। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च॥ ०॥ अव्ययम्। अत्वं। सुभू।
कीमं। पुरस्तू। आस्तु। तर्हि। रुहमू। सपदि॥ ०॥ इत्यादयो निपाताः॥ प्रादयः॥ ऊरी। उररी। फ-
रीत्यादयोऽन्ये पि ज्ञेया गणबाह्याः॥ ०॥ तद्धितश्चासर्वविभक्तिः। यस्मात् न सर्वविभक्तेरुत्प-
त्तिः स तद्धितान्तोऽव्ययं स्यात्। ततः। यतः। यत्र। तत्र॥ ०॥ कृन्मेजन्तः। कृद्यो मान्त एजन्तश्च सो-
ऽव्ययं स्यात्। स्मारं। जीवसे। पिबध्यै॥ ०॥ क्त्वातोसुन्कसुनः। एतेऽव्ययसंज्ञाः। कृत्वा। उदे-
तोः। विसृपः॥ ०॥ अव्ययादाप्सुपः। अव्ययात्परस्यापःसुपश्च लुक् स्यात्। सदृशं त्रिषु लिंगे-
षु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं। वष्टि भागुरिरल्लोपमवा-
प्योरुपसर्गयोः। आपं चैव हलंतानां यथा वाचा निशा दिशा॥ वगाहः। अवगाहः। पि-

५६

धानं। अपिधानं। छ। इत्यव्ययानि। छ। अजाद्यतष्टाप्। अजादिन्योऽकारांताच्च टाप्स्यात्
स्त्रियां। आबिति सामान्योक्त्यर्थः। पः। तदन्तविधानार्थश्च। अन्यथा एकेग्रहणे अनेकेतोऽज।
न्तात्पोन गृह्येषाता। अजा। द्युक्ति ङी पूनिषेधार्थः। अजा। एडका। अश्वा। चटका। मूषिका।
बाला। होडा। पाका। वत्सा। मंदा। विलाता। मेधा। अतः। सर्वादत्वं ताक्षा। वाचा। वाक्। दिशा।
दिक्। तपरः किं। सोमपाः। शूद्राच्चामहत्पूर्वात् जातिः। शूद्रा जातिः किं। शूद्रस्य स्त्री शू
द्री। अमहत्पूर्वेति किं। महाशूद्री। अत्र प्रकरणे तदन्तग्रहणं इष्यते। संतस्त्रा। जिन
शणपिंडेभ्यः फलात्। संफला। अजिनफला। शणफला। पिंडफला। इत्यादि। एकफले
तिकेचित्। सत्प्राक्कांडप्रांतशतैकेभ्यः पुष्पात्। सत्पुष्पा। इत्यादि। ज्येष्ठा। कनिष्ठा। मध्य
मेति। पुंयोगेपि। कोकिला। जाता वपि। मूलान्नञः। अमूला। सन्नेत्योऽङीप्र। कत्री।

दंडिती। अर्वती। राज्ञी। शुनी। मघोनी। मघवती॥ छ॥ उगितश्चाय। यथा कथं विडगितः। आबन्तात् स्त्रियां ङीप् स्यात्॥
उविडषी। श्रीमती। भवती। अतिभवती। आपूर्वस्य नो ङि त्यां पचंती। दीव्यंती। आच्छीनद्योर्नुम्। तुदंती।
तुदती। भांती। भाती। ध्वतो हगितो न। उपास्य वा। पर्णधवत्। अंचतेश्चिप्टः। प्रतीची। प्रत्यञ्ची। तिरश्ची।
अमुमुयञ्ची। उदीची॥ छ॥ वनो र च॥ वनंतात् स्त्रियां ङीप् स्यात् रश्चांतादेशः। धीवरी। दृश्वरी। वनो र नह
त्वाः राजसुध्वाः सहयुध्वा स्त्रीणां तापातो वनोऽङीप्। विरले को। अवावरी। बहुव्रीहौ वा। बहुधीवा। ब-
हुधीवरी॥ छ॥ पादोन्यतरस्यां। पाद्यंतां स्त्रियां ङीप् स्याद्वा। द्विपात्। द्विपदी॥ छ॥ टाबृचि॥ ऋचि वाच्या-
यां पादंतात् टाप् स्यात् न ङीप्। द्विपदा। ऋक्। न षट्स्वस्रादिभ्यः। पंच। चतस्रः। पंचेत्यत्र नलोपे कृते पि सं-
ताप ङिति षट्संज्ञत्वान्नलोपः सुपस्वरे ति नलोपस्यासिद्धत्वान्न षट्स्वस्रादीति न टाप्॥ छ॥ मनः॥ मन्नं-
तात् स्त्रियां न ङीप्। दामा। दामानौ। सीमा सीमानौ। अतिमहिमा। अतिमहिमानौ॥ छ॥ अनो बहुव्रीहेः।

५७

अन्नंताद्बहुव्रीहेः स्त्रियां नङीपौ। बहुयज्वानौ। छ। डाबुभाभ्यामन्यतरस्यां। मन्नंतादन्नं
ताद्बहुव्रीहेश्च डाब्वा स्यात्। टिलोपः। सीमे। सीमा। पामे पामाः। सीमानौ। पामानौ। बहु
यज्वे। बहुयज्वानि। छ। अनउपधालोपिनोन्यतरस्यां। अन्नंताद्बहुव्रीहेरुपधालोपि
नो ङीब्वा स्यात्। पक्षे डाप्निषेधौ। बहुराज्यौ। बहुराजे। बहुराजानौ। छ। प्रत्ययस्थात्का
त्पूर्वस्यात इदाप्यसुपः। प्रत्ययस्थात्ककारात्पूर्वस्याकारस्य इकारः स्यादापि परे स
आप्सुपः परो न चेत्। सर्विका। कारिका। अतः किं। नौका। असुपः किं। बहवः परिव्रा
जका यस्यां सा बहुपरिव्राजका। छ। मामकनरकयोरुपसंख्यानं। मामिका। नरिका।
त्यकत्यपोश्च। दाक्षिणात्यिका। इहत्यिका। क्वत्यिका। छ। नयासयोः। कात्पूर्वस्य प

तदोरस्यष्ठ्न्न्वात्।यकासका।पकांतकां।त्यकनश्च निषेधः।अधित्यका।उपत्यका।आशिषि वुन च
ना।जीवका।भवका।उत्तरपोस्तेनादेवदत्तिका।देवकां।यज्ञदत्तिका।यज्ञका।।सिपकादीनां नाल्पि पूः
का।ध्रुवका।चटका।तारका।ज्योतिषिः।अन्यत्र तारिका।वर्णका।तांतवे।अन्यत्र वर्णिका।वर्तका
शकुनौ प्राचां।उदीचां तु वर्तिका।अष्टका पितृदेवत्ये।अष्टिकान्या।सूतकादीनां चा।सूतका।सूति
का।पुत्रका।पुत्रिका।वृंदारका।वृंदारिका।।का।उदीचामातःस्थाने यकपूर्वायाः।यकपूर्वस्य प्र
त्ययस्था।कारस्थाने यो कारस्तस्य कात्पूर्वस्य इः स्याद्वा।आर्षिकेणह तिषेधः।कस्वः।आर्यका।आ
र्यिका।चटकिका।चटकका।आतः किं।सांकाश्येनवासा का।शियका।प्रकेति किं।अश्विका।सौत्र
त्ययः किं।शुभंयिका।धात्वंतयकोस्त्कनि त्वं।सुनायिका।सुपाकिका।।भस्त्रैषाजाज्ञाद्वास्वानञ्पू
र्वा

ण्यपि। एषामत इद्वा स्यात्। नञ्पूर्वाणामपि। नस्त्रका नस्त्रिका। अनस्त्रका। अनस्त्रिका।
द्विके द्वके। एषका। एतयोर्नञ्पूर्वयोर्नेत्वा अनेषका। अद्वके। नस्त्रादेरुपसर्जनत्वेपि वाइ
त्वं। निर्नस्त्रिका। निर्नस्त्रका। ॥ अभाषितपुंस्काच्च॥ एतस्मादत इद्वा स्यात्। गंगका। गंगिका।
अगंगका। अगंगिका। परमगंगका। परमगंगिका। बहुव्रीहौ तु नित्यं। अखट्विका। आ
दाचार्याणां। अभाषितपुंस्कादतः स्थाने आ वा स्यात्। गंगाका। अगंगाका। परमे गंगाकौ
ऊनपुंस्क स्यात्तु। अस्त्रिका॥ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्व
रपख्युनां॥ टिड्ढादिभ्यो नुपसर्जनेभ्यः स्त्रियां ङीप् स्यात्। यस्येति। कुरुचरी। नदट्। न
दी। सौपर्णेयी। ऐन्द्री। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। पंचतयी। ठक्ठञोः। आक्षि
की। लावणिकी। यादृशी। इत्वरी। आढ्यंकरणी। अनुपसर्जनात्किं। बहुकुरुचरा। एपि

क्वचित्॥ गौरी॥ क्वचिन्न॥ दंडा॥ नञ्स्नञीकक्ख्युंस्तरुणतलुनानां वा स्त्रैणी पौंस्नी॥ शाक्तीकी॥ तरुणी।
तलुनी॥ यञश्चाप्॥ यञंतात् स्त्रियां ङीप् स्यात्॥ आकारस्तौ पेन्न ता॥ हलस्तद्धितस्य॥ हल उत्तरस्य तद्धितय-
यकारस्य ईपि परे लोपः स्यात्। गार्गी॥ वात्सी॥ अनपत्यान्न ङीप्॥ द्वैपवा वैय्या॥ ॥ प्राचां ष्फ तद्धि-
तः॥ यञंतात् प्राचां मते स्त्रियां ष्फः स्यात्। स च तद्धितसंज्ञः॥ ॥ षः प्रत्ययस्य॥ प्रत्ययषः स्यादिः ष इत्
स्यात्॥ ॥ आयनेयीनीयियः फढखछघां प्रत्ययादीनां॥ प्रत्ययादिस्थितानां फादीनां मायनादयः क्र-
माद् आदेशाः स्युः। तत्तद्धिते प्रातिपदिके संज्ञायां॥ ॥ षिद्गौरादिभ्यश्च॥ षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीप् स्या-
त्॥ गार्ग्यायणी॥ ॥ वयसि प्रथमे॥ प्रथमवयोवाचिनोऽदंतात् स्त्रियां ङीप् स्यात्॥ कुमारी॥ वयस्यचरम
इति वाच्यं॥ चिरंटी॥ वरमेष्ठा॥ अदंतात् किं॥ शिशुः॥ कन्यायां न॥ ॥ द्विगोः॥ द्विगुसमासादंतो
ङीप् स्यात् स्त्रियां॥ पंचपूली॥ अजादित्वात् त्रिफला॥ ॥ अपरिमाणबिस्ताचितकंबल्ये

सा॰
५९
सा॰२

स्यो न तद्धितलुकि । अपरिमाणं ताद्धिस्ताद्यं ताद्युद्धिगोस्तद्धितलुकि न ङीप् । पंचाश्वा । द्विवर्षा । द्वि
बिस्ता । द्व्याचिता । द्विकंबल्या । परिमाणात्तु द्व्याढकी । अध्यर्द्धतिठको लुक् । काण्डांतात्क्षे
त्रे । परिमाणवाचिकाण्डांताद्विगोस्तद्धितलुकि न ङीप् क्षेत्रे वाच्ये । द्विकाण्डा क्षेत्रभक्तिः । प्रमाणे
लो । द्विगोर्नित्यमिति द्वयसचो लुक् । क्षेत्रे किं । द्विकाण्डी रज्जुः । पुरुषात्प्रमाणेन्यतरस्यां ।
प्रमाणवाचिपुरुषांतात् द्विगोस्तद्धितलुकि वा ङीप् द्विपुरुषी । द्विपुरुषा । ऊधसो नङ् ।
ऊधसंतस्य बहुव्रीहेर्नङादेशः स्यात्स्त्रियां । बहुव्रीहेरूधसो ङीष् । ऊधसं
ताद्बहुव्रीहेः स्त्रियां ङीष् स्यात् । पीनोध्नी । बहुव्रीहेः किं । प्राप्तोधाः । समासांतास्त्रियामेवेति
नस्त्रवति । महदूधो यस्या सो महोधाः पर्जन्यः । दामहायनांताच्च । संख्यादेर्बहुव्रीहेर्दामां
ताद्धायनांताच्च स्त्रियां ङीप् स्यात् । द्विदाम्नी । द्विहायनी । हायनाद्वयासि ङीप् । णत्वं वत्रि

त्रिचतुर्भ्यां हायनस्येति त्रिहायणी। चतुर्हायणी॥ वयसोन्यत्र। चतुर्हायना शाला॥ ० ॥ अंतर्वत्पति
वतोर्नुक्। एतयोस्त्रियां नुक् स्यात् तत्वाच्च ङीप्। अंतर्वत्नी। पतिवत्नी। गर्भभर्तृसंयोगे एतौ निपात्येते।
अन्यत्र। अंतर्वती। पतिमती॥ ० ॥ पत्युर्नो यज्ञसंयोगे। पत्युर्नोतादेशः स्यात्। स्त्रियां यज्ञसंयोगे। नां तद्वा
ङीपू पत्नी। अन्यत्र गवां पतिः स्त्री। वृषलपत्नी त्युपमानात्॥ ० ॥ विभाषा सपूर्वस्य। सपूर्वस्य पत्युः अ
गुक्के वा स्यात्। दृढपत्नी॥ ० ॥ नित्यं सपत्न्यादिषु। एषु पूर्वोक्तं नित्यं स्यात्। सपत्नी। एकपत्नी। सम[illegible]
वाच्यं पुंवद्दासासु दासि॥ ० ॥ पूतक्रतोरै च। अस्य स्त्रियां ऐ स्याद् ङीप् च। पूतक्रतायी। पुंयोगमत्रेष्य
पूतक्रतुः स्त्री॥ ० ॥ वृषाकप्यग्निकुसितकुसीदानामुदात्तः। एषां पुंयोगे उदात्तः ऐ आदेशो ङीप् च। वृ
षाकपायी इत्यादि॥ ० ॥ मनोरौ वा। मनोर्वा [illegible] स्यात्। ऐ च वा ङीप् च। मनायी। मनावी। मनुः।
॥ ० ॥ वर्णादनुदात्तात्तोपधात्तो नः। अनुदात्तांतात्तोपधाद्वर्णवाचिनो ङीप् वा स्यात्। तकारस्य नकारः

का। वीर

६०

एनी। एता। अनुदात्तात् किं। श्वेता। अत इत्येव। शितिः स्त्री। पिशंगाद्वा। पिशंगी। असितपलित
योर्न। असिता पलिता। क्नमिच्छन्त्येके। असिक्नी। पलिक्नी। ॥ अन्यतो ङीष्। तोपधादन्यतो
वर्णाङ्ङीष् स्यात्। स्वरविशेषः। शबली। अनुदात्तात्किं। कपिला। षिद्गौरादिङीष्। गौरी। नर्त्त
की। ॥ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः। एषामिति तद्धिते च उपधाया यलोप स्यात्।
मत्स्यस्य ङ्यां। सूर्यागस्त्ययोः छे च। तिष्यपुष्ययोर्नक्षत्राणि। यलोप इति वाच्यं। मत्सी। अन
डुही। अनड्वाही। मातामही। पितामही। इत्यादि। ऋन्नित्याषितां ङीष्। दंष्ट्रा। ॥ जानपदकुण्डगो
णस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यव
र्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु। एभ्यो यथाक्रमं वृत्त्यादि विषयेषु ङीष् स्यात्।
जानपदी। वृत्तिश्चेत्। अन्यत्रा जानपद्या ङीप्। जानपदी स्वरभेदः। कुण्डी। अमत्रं चेत्। कुण्डान्या

इत्यादि॥ उपधो ज्ञाति नि चानी ली॥ संयोगोनी। मानी ली॥ छ॥ शैंणा स्त्राचा वोणा॥ शोणी॥ छ॥ वोतो गुणवच
नात्॥ उदंतात् गुणवचनात् स्त्रियां वाङीप्रत्ययः स्यात्॥ मृद्वी॥ मृदुः॥ उतः किं॥ शुचिः स्त्री॥ गुणवचनादिति किं॥ आखुः॥
ख गुरुसंयोगोपधान्न॥ खरुः॥ पांडुः॥ छ॥ बह्वादिभ्यश्च॥ बह्वी॥ बहुः॥ पद्धती॥ पद्धतिः॥ इत्यादि॥ इतः प्राण्यंगात्॥
अंगुलिः अंगुली॥ छ॥ शकटादिकात् क्तिनः॥ सर्वतोक्तिन्नर्थादित्येके॥ राजी॥ राजिः॥ आजी॥ आजिः॥ अक्तिनः
किं॥ मतिः बुद्धिः॥ छ॥ पुंयोगादाख्यायां॥ या पुमाख्या पुंयोगात् स्त्रियां वर्त्तते ततः स्त्रियां ङीप्रत्ययः स्यात्॥ गोपी॥ गो
पालिकादीनां न॥ गोपालिका॥ छ॥ सूर्याद्देवतायां चाप्॥ सूर्यस्य स्त्री देवता सूर्या॥ अन्या सूरी॥ छ॥ इंद्रवरुणभव
शर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्॥ इंद्रादेः स्त्रियां ङीप्रत्ययः स्यात्॥ आनुगागमश्च॥ इं
द्राणी इत्यादि॥ ब्रह्माणीति केचित्॥ हिमारण्ययोर्महत्त्वे॥ महद्धिमं हिमानी॥ अरण्यानी॥ यवाद्दोषे॥ दुष्टो य
वो यवानी॥ यवनाल्लिप्यां॥ यवनानी लिपिः॥ मातुलोपाध्यायाभ्यां वा॥ मातुलानी॥ मातुली॥ उपाध्यायानी॥

बहो॰ ...ाद्उत्तरस्य बहोर्नञ् न स्वरस्य भवति

नञ् स्नुब्भ्यां नञः सुभ्यां परस्य उत्तरपदं बहुव्रीहौ स्वरः मा सिद्ध इतादि

उपाध्यायी। आचार्यादणत्वं च। आचार्यानी। आर्यक्षत्रियाभ्यां वा स्वार्थे। आर्याणी। आर्या क्षत्रियाणी। क्षत्रिया। पुंयोगे तु आर्यं च। आर्यी। क्षत्रियी। स्त्र्याणी वेति केचित्। क्रीतात्करण

पूर्वात्। क्रीतान्तात् करणादेः स्त्रियां ङीष् स्यात्। वस्त्रक्रीती। क्वचिन्न। धनक्रीता। क्तादल्पाख्यायां। करणादेः क्तान्तादल्पाख्यायां ङीष् स्यात्। अभ्रलिप्ती द्यौः। अल्पाभ्रेत्यर्थः। जि

ह्वा। अल्पाख्यायां किं। चन्दनानुलिप्ता। बहुव्रीहेश्चान्तोदात्तात्। बहुव्रीहेः क्तान्तादन्तोदा

त्तात् स्त्रियां ङीष् स्यात्। ऊरुभिन्नी। जातान्तान्न। दन्तजाता। बहुनञ्सुकालसुखादिपूर्वा

श्चेत् बहुलं तेषां इत्यादि। पाणिगृहीती भार्यायां। पाणिगृहीतान्या। अस्वाङ्गपूर्वपदाद्वा।

अस्वाङ्गादेः क्तान्ताद्बहुव्रीहेर्वा ङीष्। सुरापीती। सुरापीता। अस्वाङ्गपूर्वपदात् किं। ऊरु

भिन्नी। शङ्खभिन्नी। अन्तोदात्तात् किं। वस्त्रच्छिन्ना। स्वाङ्गाच्चोपसर्जनादसंयोगोप

धात्। असंयोगोपधात्स्वांगाउपसर्जनात्स्त्रियांङीष्वास्यात्।सुमुखी।सुमुखा।अतिकेशी।अतिकेशा।संयो
गोपधात्तु।सुगुल्फा।अंगगात्रकंठेभ्यस्त्विष्यते।स्वंगी।स्वंगा इत्यादि।अद्रवं मूर्त्तिमत्स्वांगं प्राणिस्थमविकारजं।
अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतं॥ बहुस्वेदा।द्रवत्वात्।सुज्ञाना।अमूर्त्तत्वात्।सुमुखाशाला।अप्रा
णिस्थत्वात्।सुशोफा।विकारजत्वात्।सुकेशी।सुकेशा रथ्या।अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्।सुस्तनी
सुस्तना।प्रतिमा।प्राणिवत्प्राणिसदृशे स्थितत्वात्॥ ॥नासिकोदरौष्ठजंघादंतकर्णशृंगाच्च।एतदंतात्स्त्रि
यांवाङीष्।सुनासिकी।सुनासिका इत्यादि।पुच्छाच्च।सुपुच्छी।सुपुच्छा।कबरमणिविषशरेभ्यो नित्यं।कबर
पुच्छी।इत्यादि।उपमानात्पक्षपुच्छाभ्यां।श्येनपक्षी।श्येनपुच्छी।सेना॥ ॥नक्रोडादिबह्वचः॥क्रोडादेर्बह्वच
श्च स्वांगात्स्त्रियां न ङीष्।सुक्रोडा।आकृतिगणोऽयं।सुजघना।पद्मवदना॥ ॥सहनञ्विद्यमानपूर्वाच्च।एतस्
र्वस्वांगान्नङीष्।सकेशा।अनासिका।विद्यमानोदरा॥ ॥नखमुखात्संज्ञायां।शूर्पणखा।गौरमुखा।अ

६२

एतो सूत्रसंख्या बहुव्रीहौ प्रकरणे ...

संज्ञायां ङ्डासामन्तरवी॥ ङ्डा॥ दिक्पूर्वपदात् ङीष् वा स्यात्॥ प्राङ्मुखी॥ प्राङ्मुखा॥ इह नाम्ना गुल्फा॥ पाकूकोडा॥ ज्ञा मत्स्य नाम् न क्रोडादि बहुच इति प्रतिषेधः॥ ङा॥ वाहः॥ वाहन्तात् स्त्रियां ङीष् स्यात्॥ भारौही॥ ङा॥ सख्य शिश्वी भाषायां॥ एतौ निपात्येते भाषायां॥ सखी॥ अशिश्वी॥ ङा॥ जातेरस्त्री विषयादयोपधात्॥ जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्॥ मृगी॥ हंसी॥ ब्राह्मणी॥ घटी॥ गोत्रचरणेऽपि जातिरिष्यते॥ नाडायनी॥ कठी॥ बह्वृची॥ जातेः किं। मुण्डी इत्यादि॥ ङा॥ पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च॥ पाकाद्युत्तरपदाज्जाति वाचिनः स्त्री विषयादपि ङीष् स्यात्॥ ओदनपाकी॥ शङ्कुकर्णी॥ शालिपर्णी॥ शङ्खपुष्पी॥ सस्यफली॥ दर्भमूली॥ गोवाली॥ ङा॥ इतो मनुष्यजातेः॥ इदन्तात् मनुष्यजातेः स्त्रियां ङीष्

मुंडा ऽस्त्री विषयात् तु बलाका॥ योपधत्वा त्क्षत्रिया॥ गवयहयमुकयमत्स्यमनुष्याणां न निषेधः ४

स्यात्। अवन्ती। दाक्षी। मनुष्यजातेः किं। तित्तिरिः॥ ७॥ ऊङुतः। उदन्तान्मनुष्यजातेस्त्रियामूङ् स्या-
त्। असवर्णे दीर्घः॥ कुरूः। अन्तादिवच्च। योपधप्रतिषेधे कादेशाः सप्तवर्स्यां तवत्परस्यादिवदस्या तां इत्यंतवज्ञा
वाऽस्याद्युत्पत्तिः। कुरूः। अयोपधादित्येवा। अध्वर्युः। अप्राणिजातेश्चारज्ज्वादीनामिति वाच्यं। कर्कन्धूः।
प्राणिजातेस्तु। धेनुः। रज्ज्वादेस्तु। रज्जुः। हनुः॥ ८॥ पंगोश्च। पंगूः। श्वशुरस्योकाराकारयोर्लोपश्च। श्वश्रूः॥ ९
ऊरूत्तरपदादौपम्ये॥ ऊरुवंतात् स्त्रियामूङ् स्यादौपम्ये। करभोरूः॥ १०॥ संहितशफलक्षणवामादेश्च।
संहितादेरूरुवंतात् स्त्रियामूङ् स्यादनौपम्येऽपि। संहितोरूः। इत्यादि। सहितसहाभ्यां च। सहितोरूः।
सहोरूः॥ तन्वादेर्वा वैदिके वित्। तनुः। तनूः। चंचुः। चंचूः॥ शार्ङ्गरवाद्यञो ङीन्। शार्ङ्गरवादेरञंता रवा
च जातिवाचिनः स्त्रियां ङीन् स्यात्। स्वरे भेदः। शार्ङ्गरवी इत्यादि। नैदी। नृनरयोर्वृद्धिश्च।

६५

नारी॥ का॥ यङश्चाप्॥ यङंतात् स्त्रियां चाप् स्यात्॥ चकारः स्वरार्थः। कौमुद्गंध्या। कारीषगंध्या। वाराह्या॥
षात्परावञश्चाबाच्यः। पौतिमाष्या॥ ॥ यूनस्तिः। युवन्शब्दात् स्त्रियां तिः स्यात्॥ ङीपोपवादः तद्धितश्चायु
त्पत्तिः॥ युवतिः॥ ॥ इति स्त्रीप्रत्ययाः॥ ॥ प्रातिपदिकार्थलिंगपरिमाणवचनेऽथ मा॥ प्रा मात्रे
तिपदिकार्थः सत्तामात्रं त्राद्यः प्रत्येकमभिसंबध्यते। तन्मात्रादिष्वर्थेषु प्रथमा स्यात्॥ उच्चैः। नीचैः। कृष्णः।
श्रीः। ज्ञानं। खारी। द्रोणः। आढकं। एकः। द्वौ। बहवः। इदर्थेषु तद्धितार्थे अपगवः। समासा
र्थे चित्रगुः॥ ॥ संबोधने च॥ संबोधने च प्रथमा स्यात्॥ हे राम॥ ॥ कर्तुरीप्सिततमं कर्म॥ क
र्तुः क्रियया आप्तुमिष्टतमं कर्मसंज्ञं स्यात्॥ ॥ कर्मणि द्वितीया॥ तिङ्कृत्तद्धितसमासै
रनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति॥ तिङाद्यनभिहिते तु कर्मादिकारके प्राति

पद्रिकार्थे प्रथमासेव्यते सेवितो लक्ष्याश्रासानंदः सदा हरिः। तद्धितो क्तो वातेन क्रीतः॥ ॥क्वातयायु
क्तं चानीप्सितं ग्रहिप्सितवन्मवत्। क्रियायुक्तमनीप्सितमपि कर्मसंज्ञं स्यात्। तावि षंस्पृष्ट्वेः ग्रामं गच्छन्नरतां
वस्पृशति॥ ॥कं चेप्सितं च॥ ॥अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। दुह्याच्पच्दण्ड्रुधिप्रच्छिचि
ब्रूशासुजिकर्मयुक्तानी कृत्स्नं थवहदंडिग्रहहतश्वविद्धि कर्मभाक्॥ योऽदोहधरामन्तं यथा वेव
सुधां बलिं॥ करोधै दैत्यान्याताल पच्छेदं दं च वांछितां धमनि वाचिनो देदर्मंत्रवी तीन्द्रसे विनः॥ पाथिकान
न्वयां न्याहन्ति। विलोकीमजयद्धिशत्र॥ ॥खार कामनयन्वं धन्दतु किमलीमहरस्तुरां चकर्षकंसं विपिनं स
मंथक्षीरधिं सुधां॥ ॥अवहन्मदरां सिंधुमदं उपहरीन मनुं जग्माहच्युतरंगाक्रमम्तुलाहितिनां म्लुषां॥ ६॥ ६४
पचति ग्रामणीनां कर्मण्यः फलंतं हरिं भजेत्। यत्र कृत्याहयो हि कर्मकादृतिके चित्॥ ॥गति बुद्धिप्रत्यव

सानार्थशब्दकर्माकर्मकाणामणौ। गत्यर्थादीनामणौ यः कर्त्ता स णयन्तानां कर्मसंज्ञः स्यात्॥ श
त्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्। आशयच्चामृतं देवान्वेदमध्यापयद्विधिं॥१॥ आसयत्
सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः॥ नीवह्योर्नीनाययति वाहयति वा भारं भृत्येन। नियन्तृकर्तृ
कस्य वहेरनिषेधः। वाहयति रथिनं वाहान् सूतः। आदिखाद्योर्न। आदयते खादयति वा
न्नं बटुना। भक्षेरहिंसार्थस्य न। भक्षयत्यन्नं बटुना। हिंसार्थस्य तु। भक्षयत्यमात्यमरीन्नृराजा॥
स्नुपयद्दध्यामिति केचित्। आचतिश्नौतं गौश्चोच्चू त्राह्वयति वेदं बटुं॥ दर्शयति तत्कान्दे
वं। अभ्यकं दत्ताद्यपकेयांनेति केचित्। आययति सैनिकैररीन्। क्रंदयति सैनिकैररीन्॥ नाह्व
ययति कारयति वा भृत्यैररिं पुं॥ ह्रक्रोरन्यतरस्यां। ह्रक्रोरणि कर्त्ता स णौ वा कर्मसंज्ञः स्यात्॥

परिक्रयणे संप्रदानमित्यस्मादिह मंडूकप्लुत्यान्यतरस्यांग्रहणं
मनुवर्त्यं व्यवस्थितविभाषाश्रयणात् ...

हारयति। कारयति। भृत्यं भृत्येन वा कटं॥ अभिवादिदृशोरात्मनेपदे चेति वाच्यं। अभिवादयते द
र्शयते देवं भक्तं भक्तेन वा॥ [illegible] ॥ अधिशीङ्स्थासां कर्म॥ अधिपूर्वाणामेषामाधारः कर्मसंज्ञः स्या
त्। अधिशेते। अधितिष्ठति। अध्यास्ते वा वैकुण्ठं हरिः॥ [illegible] ॥ अभिनिविशश्च॥ अभिनिपूर्वस्य वि
शतेराधारः कर्मसंज्ञः स्यात्। अभिनिविशते सन्मार्गं। क्वचिन्न। पापेऽभिनिवेशः॥ [illegible] ॥ उपा
न्वध्याङ्वसः॥ उपादिपूर्वस्य वसतेराधारः कर्मसंज्ञः स्यात्। उपवसति। अनुवसति। अधिवसति।
आवसति वा वैकुण्ठं हरिः। अभुक्त्यर्थस्य न। वने उपवसति। अभुक्त्यर्थस्य काले। हरिदिनमु
पवसति। उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥ ६५
उभयतो गोपाः कृष्णं सर्वतः कृष्णं धिक् कृष्णाभक्तं। उपर्युपरि लोकं हरिः। अध्यधि लोकं। अधोऽधो

लोके। अभितः। परितः। समया। निकषा। हा। प्रति। योगेपि। अभितः कृष्णमित्यादि। छ।
अंतरांतरेणयुक्ते। आभ्यां योगे द्वितीया स्यात्। अंतरा त्वां मां हरिः। अंतरेण हरिं न सुखं। छ।
अनुर्लक्षणे। लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यात्। गत्युपसर्गसंज्ञापवादः
छ। कर्मप्रवचनीययुक्ते द्वितीया। कर्मप्रवचनीयैर्योगे द्वितीया स्यात्। उपमनुप्राव
र्षत्। छ। तृतीयार्थे। अनुस्तृतीयार्थे उक्तसंज्ञः स्यात्। नदीमन्ववसिता सेना। नद्यास
ह संबंधा इत्यर्थः। छ। हीने। हीने द्योत्ये अनुरुक्तसंज्ञः। अनु हरिं सुराः। हरेर्हीना इत्यर्थः।
छ। उपोधिके च। उपशब्दः अधिके हीने च कर्मप्रवचनीयसंज्ञः स्यात्। अधिके सप्तमी
वक्ष्यते। उप हरिं सुराः। हीना इत्यर्थः। छ। लक्षणे इत्थंभूताख्यानभागवीप्सासु प्र

कारकविभक्तेर्बलीयस्त्वान्नांच । द्वितीया । निघ्ना ताव तार्थे तु वचनी

तिपर्यनवः । एष्वर्थेष्वेते उक्तसंज्ञाः स्युः । लक्षणे । हरिं प्रति । हरिं परि । हरिमनु वा । हेतौ तृतीयायां बाधि
तं अनुर्लक्षणे इति सूत्रे चेत्थंभूताख्याने । भक्तो विष्णुं प्रति पर्यनु वा । भागे । लक्ष्मीर्हरिं प्रति पर्यनु
वा वीप्सायां । वृक्षं वृक्षं प्रति पर्यनु वा प्रस्नुः । एषु किं । परिषिञ्चति । अत्रोपसर्गत्वान्न षत्वं ॥ अभि
रभागे । भागवर्जिते लक्षणादावभिरुक्तसंज्ञः स्यात् । हरिमभि वर्त्तते । भक्तो हरिमभि । देवं देवम
भिसिञ्चति । अभागे किं । यदत्र ममाभिष्यात्तद्दीयतां ॥ अधिपरी अनर्थकौ । अधिपरी अनर्थ
कावनर्थान्तरवाचिनौ कर्मप्रवचनीयसंज्ञौ स्तः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति ॥ अतिर
तिक्रमणे च । अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयसंज्ञः स्यात् । अति देवान् कृष्णः ॥ का
लाध्वनोरत्यन्तसंयोगे । गुणक्रियाद्रव्यैः कालाध्वनोरत्यन्तसंयोगे द्वितीया स्यात् । मासं कल्याणी ।

गतिसंज्ञाबाधार्थमिति गतित्वात् निघातो न ॥

मासमधीते। मासं गुडधानाः। क्रोशं कुटिलानदी। क्रोशमधीते। क्रोशं गिरिः। अत्यंतसंयोगे किं। मासस्य द्विरधीते। क्रोशे द्वारका। क्रोशैकदेश इत्यर्थः। अति। स्तते। येनातेन योगे द्वितीयेति केचित्। देवानतितम्रः। स्तते लक्ष्मि त्यादि। स्वतंत्रः कर्ता। क्रियायां स्वातंत्र्येण विवक्षितोर्थः कर्ता स्यात्। साधकतमं करणं। क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। कर्तृकरणयोस्तृतीया। अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेणाहतो बाणेन हतो वाली। लघु हरिः करोति। जीवनाशाद्यैः कः। लतादिभ्यः। प्रकृत्यादिभ्यस्तृतीया। प्रकृत्याचारुः। प्रायेण मेघः। गोत्रेण गार्ग्यः। द्विद्रोणेन धान्यं क्रीणाति। द्विद्रोणेन क्रीणातीत्यर्थः। पंचकेन पशून् क्रीणाति। दिवः कर्म च। दिवः साधकतमं कर्मसंज्ञं वा स्यात्। अक्षैरक्षान्वा दीव्यति। अपवर्गे तृतीया। अपवर्गः फलप्राप्तिः। तस्यां द्यो

इति कारकं

स्यायां कालाध्वनोरत्यंतसंयोगे तृतीया स्यात्॥ अत्र क्रोशेनानुवाकोऽधीतः। अपवर्गे किं मास
मधीतो नायातः॥ सू॥ सहयुक्तेऽप्रधाने॥ सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्॥ पुत्रेण सहागतः। एवं सा
कं सार्द्धं समं योगेपि। विनापि तद्योगे तृतीया। वृद्धो यूनेति निर्देशात्॥ सू॥ येनांगविकारः॥ येनांगेन
विकृतेनांगिनो विकारस्तत्र तृतीया स्यात्॥ अक्ष्णा काणः। पादेन खंजः। अंगविकार इति किं। अक्षि का
णमस्य॥ सू॥ इत्थंभूतलक्षणे॥ कंचित्प्रकारं प्राप्तस्येत्थंभूतः तस्य लक्षणे तृतीया स्यात्॥ छात्रेणोपाध्यायम
द्राक्षीत्॥ सू॥ संज्ञोऽन्यतरस्यां कर्मणि॥ संपूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्॥ पित्रा पितरं वा संजा त
नीते॥ सू॥ हेतौ॥ हेतुवाचिनस्तृतीया स्यात्॥ ज्ञलयेन दृष्टो हरिः॥ सू॥ मातादृवीप्सायां कर्मणि तृतीया
चेति केचित्॥ अतस्वक्त्यायप्रतिपद्यः रातेन वा। वारणार्थप्रयोगे तृतीयेति केचित्॥ अध्वं विलंबेन॥ ६९
तृतीया तत्कृतार्थेनेति तृतीसमासे कोर्थ प्रसक्तयोगे तृतीयासप्तम्यौ हि रित्यन्ये। रूपकापदेनापादियोगेवि।
स्तो

मासेन पूर्वः। मासेनावरः। तुल्येन हीनः। खण्डेन सकलः। गुडेन मिश्रः। आचिष्टव्यवहारे। चतुर्थ्यपि
तृतीया। दास्या संयच्छते कामुकः। धर्मेण्तु भार्यायै संयच्छति॥छ॥ कर्मणा यमभिप्रैति स संप्रदानं॥ दा
नस्य कर्मणा यं अभिप्रैति स संप्रदानसंज्ञः स्यात्॥छ॥ चतुर्थी संप्रदाने। संप्रदाने चतुर्थी
स्यात्। विप्राय गां ददाति। अनन्ति हि तद्ध्येवादानीयो विप्रः॥ क्रियया यमभिप्रैति सोपि संप्रदा
नं पत्येत्येते। कर्मसंप्रदानयोः करणकर्मविवाच्यो पशुना रुद्रं यजति। पशुं रुद्राय ददातीत्य
र्थः॥छ॥ रुच्यर्थानां प्रीयमाणः। रुच्यर्थानां प्रीयमाणोर्थः संप्रदानं स्यात्। हरये रोचते भक्तिः।
॥छ॥ श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः। श्लाघादेर्ज्ञापयितुमिष्टः संप्रदानं स्यात्। गोपी स्मरात् कृष्णाय
श्लाघते ह्नुते तिष्ठते शपते वा॥छ॥ धारेरुत्तमर्णः। धारेरुत्तमर्णः संप्रदानं स्यात्। हरये स्पृहयति

॥ सू॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः॥ क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात्॥ ह
रये क्रुध्यति। द्रुह्यति। ईर्ष्यति। असूयति वा गोपी सत्या॥ यं प्रति कोप इति किं। भार्यामीर्ष्यति मैनामन्यो
द्राक्षीदिति॥ सू॥ क्रुधद्रुहोरुपसृष्टयोः कर्म॥ उपसृष्टयोरेतयोः प्रागुक्तः कर्मसंज्ञः स्यात्। क्रूरमभि
क्रुध्यति। अभिद्रुह्यति॥ सू॥ राधीक्ष्योर्यस्य विप्रश्नः। एतयोः कारकं संप्रदानसंज्ञं स्यात्॥ यस्य विविधः
प्रश्नः क्रियते। कृष्णाय राध्यति। ईक्षते वा। पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः॥ सू॥ प्रत्याङ्भ्यां श्रु
वः पूर्वस्य कर्ता। आभ्यां परस्य शृणोतेर्योगे पूर्वस्याः प्रवर्तनक्रियायाः कर्ता संप्रदानं स्यात्। विप्राय
गां प्रतिशृणोति। आशृणोति। प्रतिजानीत इत्यर्थः॥ सू॥ अनुप्रतिगृणश्च॥ आभ्यां गृणातेः कारकं पूर्व
स्य कर्तृभूतं संप्रदानं स्यात्। होत्रेऽनुगृणाति प्रतिगृणाति। होता प्रथमं शंसति तं प्रोत्साहयतीत्यर्थः॥

ह

६८

ष्ठा।परिक्रयणे संप्रदानमन्यतरस्यां।। नियतकालं भृत्या स्वीकरणं परिक्रयः। तत्करणं
संप्रदानं वा स्यात्।। शतेन शताय वा परिक्रीतः। तादर्थ्ये चतुर्थी वक्तव्या। मुक्तये हरिं भजति
क्लृप्यर्थे संपद्यमाने च। भक्तिर्ज्ञानाय कल्पते संपद्यते जायते इत्यादि।। उत्पातेन ज्ञापिते च
। वाताय कपिला विद्युत्। हितयोगे च।। ब्राह्मणाय हितं।। क्रियार्थोपपदस्य च कर्म
णि स्थानिनः।। क्रिया क्रियार्था उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्म
णि चतुर्थी स्यात्। फलेभ्यो याति। फलान्याहर्तुं यातीत्यर्थः।। तुमर्थाच्च भाववचनात्।। तु
मर्थाद्ये भाववचनाद् घञादयस्तदंतात् चतुर्थी स्यात्। यागाय याति। यष्टुं यातीत्यर्थः।। नमःस्व
स्तिस्वाहास्वधालंवषड्योगाच्च। एभिर्योगे चतुर्थी स्यात्। हरये नमः। इत्यादि।। अलमिति पर्याप्त्य

र्थग्रहणं तेन दैत्येभ्यो दुहित्वा श्वा तु:। मत्तः। समर्थः। इत्यादि। अचाद्यपि षष्ठी बाधितुं चकारः। क्वचि
गोभ्यो भयात्। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति नमनसयोगे द्वितीयैवान मस्करोति
देवान्॥ ८॥ मन्यकर्मण्यनादरे विभाषाप्राणिषु॥ प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी स्यात्। अनादरे
न त्वां तृणाय मन्ये न त्वां तृणं मन्ये। अनादरे किं। त्वां देवं मन्ये। अप्राणिष्विति नौकाकान्नशुकश्
गालवर्जमिति वाच्यं। नेह। न त्वां नावं मन्ये। इत्यादि॥ ९॥ गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्व
नि॥ गत्यर्थानां धातूनां कर्मण्यध्ववर्जे द्वितीयाचतुर्थ्यौ स्तः। चेष्टायां व्रजं व्रजति। व्रजाय व्रजति चेष्टः। चे
ष्टायां किं। चेष्टायां किं मनसा काशीं याति। अनध्वनीति किं। मार्गं याति। उत्पथमतौ स्याद्देवा। उत्पथे ८७
न पथे गच्छति। द्वितीयाग्रहणं। सद्योगे षष्ठीं बाधितुं। ग्रामामायगंता। ग्रामं गंता॥ १०॥ अधिकं वमपाये पादानं।

अपायो विश्लेषः तस्मिन्सत्यद्ध्रुवं अवधिभूतं तदपादानं स्यात् ॥ छ ॥ अपादाने पंचमी ॥ अपादाने का
रके पंचमी स्यात् । ग्रामादायाति । धावतोऽश्वात्पतति । जुगुप्साविरामप्रमादार्थानां यत्तदपादानं । पापा
ज्जुगुप्सते । पापाद्विरमति । धर्मात्प्रमाद्यति ॥ छ ॥ भीत्रार्थानां भयहेतुः । भयार्थत्राणार्थानां प्रयोगे भ
यहेतुरपादानं स्यात् । चोराद्बिभेति । चोरात्त्रायते । छ । पराजेरसोढः । पराजेः प्रयोगेऽसह्यो
र्थोपादानं स्यात् । पापात्पराजयते । छ । वारणार्थानामीप्सितः । वारणार्थानां प्रयोगे ईप्सितो
र्थोऽपादानं स्यात् । यवेभ्यो गां वारयति । छ । अंतर्द्धौ येनादर्शनमिच्छति । अंतर्द्धौ व्यवधा
ने तन्निमित्तमात्मनो येनादर्शनमिच्छति तदपादानं स्यात् । मातुर्निलीयते कृष्णः ॥ छ ॥ आख्या
तोपयोगे । विधिपूर्वकं विद्याग्रहणमुपयोगः । उपयोगे विद्यास्वीकरणे आख्याताऽप्र

पादानं स्यात्। उपाध्यायादधीते। उपयोगे किं। गायनस्य शृणोति। छ। जनिकर्तुः प्रकृतिः। जायमानस्य प्र-
कृतिर्हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायंते। छ। भुवः प्रभवः। भवनं भूः भूकर्तुः प्रभवस्तथा। हि-
मवतो गंगा प्रभवति। प्रथमं दृश्यत इत्यर्थः। छ। ल्यब्लोपे कर्मण्यधिकरणे पंचमी वाच्या। प्रासादात्प्रेक्ष-
ते। आसनात्प्रेक्षते। प्रासादमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः। प्रश्नाख्यानयोश्च। कस्मात्त्वं
नद्याः। छ। यतश्चाध्वकालनिर्माणं तत्र पंचमी। तद्युक्तादध्वनः प्रथमासप्तम्यौ। कालात्स-
प्तमी। वनाद्ग्रामो योजने योजनं वा। कार्त्तिक्या आग्रहायणी मासे। छ। अन्यारादितर-
र्त्तेदिक्शब्दांचूत्तरपदाजाहियुक्ते। एतेषु युक्ते पंचमी स्यात्। अन्य इत्यर्थग्रहणं। अन्यः कृष्णा-
त्। भिन्नो रामात्। आराद्वनात्। इतरो रामात्। ऋते कृष्णात्। दिक्शब्दाः पूर्वो ग्रामात्।

अयमस्मात्पूर्वः। अञ्चूत्तरपदात्। प्राग्ग्रामात्। आच्। दक्षिणा ग्रामात्। आहि। दक्षिणाहि ग्रामा-
त्। आरादर्थयोगेपीति केचित्। वनादारात् वनात्समीप इति सेव्यो हरिः। बहिर्योगे च। ग्रामाद्बहिः।
॥८॥ अपपरी वर्जने। एतौ वर्जने कर्मप्रवचनीयसंज्ञौ स्तः॥९॥ आङ् मर्यादावचने। आङ् मर्यादायामु-
क्तसंज्ञः स्यात्। वचनग्रहणादभिविधावपि॥१०॥ पञ्चम्यपाङ्परिभिः। एतैः कर्मप्रवचनीययोगे पंच-
मी स्यात्। अप हरेः। परि हरेः संसारः। परिरत्र वर्जने। लक्षणादौ तु हरिं परि। आमुक्तेः संसारः। आस-
कलाद्ब्रह्म॥११॥ प्रतिः प्रतिनिधिप्रतिदानयोः। एतयोरर्थयोः कर्मप्रवचनीयसंज्ञः स्यात्॥१२॥ प्रति-
निधिप्रतिदाने च यस्मात्॥ यस्मात्प्रतिनिधिप्रतिदाने स्तः। तत्कर्मप्रवचनीययुक्ते पंचमी स्यात्। प्र-
द्युम्नः कृष्णात्प्रति। तिलेभ्यः प्रतियच्छति माषान्॥१३॥ अकर्तर्यृणे पञ्चमी। ऋणाद्धेतोरकर्तृवर्जे

नविवक्षितातत्रपंचमीस्यात्।शताद्बद्धः।अकर्त्तरीतिकिं।शतेनबद्धः॥ ॥विभाषागुणेऽस्त्रियां॥
गुणेहेतौवाऽस्त्रीलिंगेवापंचमीतृतीयेस्तः।जाड्याद्बद्धः।जाड्येनवा।गुणादितिकिं।धनेनकुलं।अ-
स्त्रीतिकिं।बुद्ध्यामुक्तः।योगविभागात्धूमादग्निः॥ ॥पृथग्विनानानाभिस्तृतीयान्यतरस्यां॥
एभियोगेतृतीयावास्यात्पक्षेपंचमीद्वितीयाच।पृथग्ग्रामात्वा।ग्रामेणग्रामंवाइत्यादि॥क-
रणेचस्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य॥एभ्योऽद्रव्यवाचिभ्यःकरणेतृतीयापंचम्यौ
स्तः।पदार्थधर्ममात्रकरणात्तयाविवक्षिते।नद्रव्यंतदास्तोकादीनामसत्ववचनता।केनमुक्तः।
स्तोकात्मुक्तः।इत्यादि।असत्वेतिकिं।स्तोकेनविषेणहतः॥ ॥दूरांतिकार्थेभ्योद्वितीयाच॥
एतैर्योगेषष्ठीस्यात्पक्षेपंचमी।दूरंनिकटंवाग्रामस्यग्रामात्वा॥ज्ञोविदर्थस्यकरणे॥जाना-

३१

(७)

एनोः समर्थस्यः प्रातिपदिकार्थे द्वितीया पंचमी तृतीया स्युः। ग्रामस्य दूरं ग्रामस्यांतिकं। दूरात् दूरे
ण वा॥ छ॥ षष्ठी शेषे। कारक प्रातिपदिकार्थव्यतिरिक्तः स्वः स्वामिसंबंधादिः शेषः॥ तत्र षष्ठी स्यात्।
यथा त्र ग्रहणं शेषस्तेन द्वयोः पर्यायेण वा न स्यात्। राज्ञः पुरुषः। कर्मत्वप्रीति केचित्। जे नचांतोश्च
करणयोः॥ छ॥ षष्ठी हेतुप्रयोगे। हेतुत्वात् प्रयोगे हेतौ द्योत्ये षष्ठी स्यात्॥ अन्नस्य हेतोर्वसति॥ छ॥
सर्वनाम्नस्तृतीया च। सर्वनाम्नो हेतुप्रयोगे षत्तृतीया स्यात् षष्ठी च। कस्य हेतोः। केन हेतुना। इत्या
दि। सर्वनामयोगे निमित्तकारणहेत्वर्थेषु सर्वासामिष्टिः। किं निमित्तं केन निमित्तेन। [illegible] इत्यादि।
एवं किं कारणं किं प्रयोजनं किं कार्यं किमर्थमित्यादि॥ निमित्तादिप्रयोगे सर्वनामयोगे विभ

तिपदिकमात्राच्चतीयाद्यपवति केचित्।। ज्ञानेन निमित्तेन हरिः सेव्यः।। ६५।। षष्ठ्यतसर्थ
प्रत्ययेन। एतद्योगे षष्ठी स्यात्।। दक्षिणतो ग्रामस्य। पुरस्ताद्ग्रामस्य।। ६६।। एनपा द्वितीया। एन
पायोगे द्वितीया स्यात्। षष्ठी च। दक्षिणेन ग्रामस्य।। ६७।। दूरांतिकार्थैः षष्ठ्यन्यतरस्यां। एतद्योगे
षष्ठी स्यात् पक्षे पंचमी।। दूरं निकटं वा ग्रामस्य ग्रामाद्वा।। ६८।। ज्ञोऽविदर्थस्य करणे। जानातेर
ज्ञानार्थस्य करणे षष्ठी स्यात्। सर्पिषो जानीते। सर्पिषा करणेन प्रवर्तत इत्यर्थः। अवि
दर्थस्य किं। स्वरेण पुत्रं जानाति।। ६९।। अधीगर्थदयेशां कर्मणि। एषां कर्मणि शेषत्वेन विवक्षि
ते षष्ठी स्यात्।। अधीगर्थाः स्मृत्यर्थाः। मातुरध्येति पितुः स्मरति। सर्पिषो दयते। जगतामीष्टे

१२

षद्वये वा मातरं स्मरति ॥ ५२ ॥ कृञः प्रतियत्ने ॥ गुणाधानेऽर्थे कृञः कर्मणि षष्ठी स्यात् । एकस्योपस्कुरुते ॥ ५३ ॥ रुजार्थानां भाववचनानामज्वरेः ॥ भाववकर्तृकाणां रुजार्थानां ज्वरिवर्जितानां कर्मणि षष्ठी स्यात् । चोरस्य रुजति रोगः । भाव इति किं । नदी कूलं रुजति । अज्वरिसंताप्योर्वाच्यं । चोरं ज्वरयति । संतापयति वा । श्लेष्म एव चोरं रुजति ॥ ५४ ॥ आशिषि नाथः ॥ नाथतेः कर्मणि षष्ठी स्यात् । आशिषि सर्पिषो नाथते । आशिषि किं । वटुं नाथति । याचत इत्यर्थः ॥ ५५ ॥ जासिनिप्रहणनाटक्राथपिषां हिंसायां ॥ एषां हिंसार्थानां कर्मणि षष्ठी स्यात् चोरस्योज्जासयते । निप्रौ संहतौ व्यस्तौ विपर्यस्तौ वा । चोरस्य निप्रहन्ति । निहन्ति प्रहन्ति प्रणिहन्ति वा । चोरस्योन्नाटयति । चोरस्योत्क्रामति । चोरस्य पिनष्टि । हिंसायां किं । धानाः पिनष्टि । श्लेष्म एव चोरं निहन्ति ॥ ५६ ॥ व्य

वहृपणोःसमर्थयोः।एतयोर्द्यूतेव्यवहारेसमर्थयोःकर्म्मणिषष्ठीस्यात्।शतस्यव्यवहरतेपणते
वा।समर्थयोरितिकिं।शलाकांव्यवहरति।विक्षिपतीत्यर्थः।ब्राह्मणंपणायति।स्तौतीत्यर्थः।
शेषएवशतंव्यवहरति॥ष॥दिवस्तदर्थस्य॥द्यूतार्थस्यदिवःकर्म्मणिषष्ठीस्यात्।शतस्यदीव्य
ति॥छ॥विभाषोपसर्गे॥उपसर्गेपतिदिवःकर्म्मणिषष्ठीवास्यात्।शतस्यशतंवाप्रदीव्य
ति॥छ॥कृत्वोर्थप्रयोगेकालेधिकरणे॥कृत्वोर्थानांप्रयोगेकालवाचिन्यधिकरणेषष्ठीस्यात्।
पंचकृत्वोह्नोभुंक्ते।शेषएवा।द्विरह्न्यधीते॥छ॥कर्त्तृकर्म्मणोःकृति॥कृत्प्रयोगेकर्त्तरिकर्म्म
णिचषष्ठीस्यात्।सृष्टस्यकृतिः।जगतःकर्त्तास्रष्टः।कृतिकिं।तद्धितेमाभूत्।कृतपूर्वी
कटं।शेषएवेतिनिवृत्तं॥छ॥उभयप्राप्तौकर्म्मणि॥उभयोःप्राप्तोर्यस्मिन्।तत्रकर्म्मण्येवष

षीस्यात्। विचित्रं गवां दोहो गोपेन। स्त्रीप्रत्यययो रकारयोः प्रयोगे नेति वाच्यं। भेदिका बि
भित्सा वा रुद्रस्य जगतः। शेषे स्त्रीप्रत्यये वा। विचित्रा जगतः कृतिर्हरेर्हरिणा वा। केचिद
विशेषेण विभाषामिच्छंति। शब्दानामनुशासनमाचार्येणाचार्यस्य वा। क्तस्य च वर्त्तमा
ने। वर्त्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। सतो ज्ञातः। नपुंसके भावे क्तस्य योगे शेषवि
वक्षायां वा सतो गतं। कर्त्तृत्वे तु सद्भिर्गतं। छ। अधिकरणवाचिनश्च। अधिकरणवाचि
नः क्तस्य योगे षष्ठी स्यात्। इदमेषामासितं। छ। नलोकाव्ययनिष्ठाखलर्थतृनां। एषां
प्रयोगे कर्तृकर्मणोः षष्ठी न स्यात्। लादेशाः। कुर्वन् कुर्वाणः। चकृवान् चक्राणः। च
क्रिवान् सृष्टिं हरिः। उ। हरिं दिदृक्षुः। अलंकरिष्णुः। उक। दैत्यान् घातुको हरिः। कमेर

निषेधः। तस्याः कामुकं हरिः। अव्ययाजगत्सृष्ट्वा सुखं कर्त्तुं निष्ठादित्वान्न तवान्ता विष्णुनाहता दैत्याः। खलर्थः। ईषत्करः प्रपंचो हरिणा। इति तिवान्तकारस्य च नोन कारेण त्वाहारः। शानन्ना सोमं पवमानः। आत्मानं मंडयमानः। चातुं निघ्नानः। शास्त्रं वेदमधीयन्ना चन्नाकर्त्ता लोकान्याह्वा। द्विषः शत्रुर्वा। मुरस्य मुरं वा द्विषन्ना। आ अकेनोर्भविष्यदाधमर्ण्ययोः। न विष्यदकस्य भविष्यदाधमर्ण्यार्थेन च योगे कर्मणि षष्ठी न स्यात्। तामतः पालकोऽवतरति व्रजं गामी। सुखमर्णं दायी। कृत्यानां कर्त्तरि वा। कृत्यानां प्रयोगे कर्त्तरि वा षष्ठी स्यात्। मया मम वा सेव्यो हरिः। उभयप्राप्तौ कर्मण्येव षष्ठी नानेन तव्यावज्रं गमनं मेघः। सर्वेन्न॥ तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां तुल्यार्थैर्योगे तृतीया षष्ठ्यौ स्तः। तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। तुल्यः सदृशः समो वा प्रद्युम्नः। अत्र तु लोपमा

१७

ष्यामिति किं। द्वेषषष्ठ्येवा तुल्लोपमाबान्तलस्य नास्ति॥७॥ चतुर्थी चाशिष्यायुष्यमद्रभद्र
कुशलसुखार्थहितैः। आयुष्यादिभिर्योगे षष्ठीचतुर्थ्यौ स्तः। आशिषि चेत्स्यायत्तस्य वा चि
रं जीवतात् त्वया वा॥ एवमायुष्यादिभिः। आशिषीति किं। आयुष्यं देवदत्तस्य तपः। द्र स्यथा
नां करणे षष्ठी वा। फलैः फलानां वा तृप्तः॥७॥ आधारोधिकरणं। क्रियाश्रयः कर्तृकर्मतो
राधारोधिकरणसंज्ञः स्यात्॥७॥ सप्तम्यधिकरणे च। अधिकरणे सप्तमी स्यात्। वा हृदंति
कार्येत्वपः। औपश्लेषिकः सामीपिको विषयो व्याप्त इत्याधारश्चतुर्धा। कटे आस्ते स्थाल्यां पचति
नद्यामास्ते। तर्के ऊहावः। सर्वस्मिन्निहितः। वनस्य दूरेऽन्तिके वा। कस्येति विषयस्य कर्म

ष्यपि। अधीती व्याकरणे। साध्वसाधुप्रयोगे च। साधुस्त्वं मातरि। असाधुर्मातुले। अर्हा
णां कर्तृत्वे अनर्हाणामकर्तृत्वे तद्वैपरीत्ये वा। सत्सु तरत्सु असत्सु आसते। असत्सु तिष्ठ
त्सु संतरंति। सत्सु तिष्ठत्सु अज्ञास्तरंति। निमित्तात्कर्मयोगेपि। चर्मणि द्वीपिनं हंति॥ का॥ य
स्य च भावेन भावलक्षणं। भावक्रिया यस्य क्रियया क्रियांतरं लक्ष्यते ततः सप्तमी स्यात्। गोषु
दुह्यमानासु गतः॥ छ॥ सप्तमीपंचम्यौ कारकमध्ये। कारकद्वयमध्यस्थयोः कालाध्वनो
रेते स्तः। अद्य भुक्त्वायं द्व्यहाद्व्यहे वा भोक्ता। इहस्थोयं क्रोशात्क्रोशे वा लक्ष्यं विध्य
ति। अधिकेन योगे पीति केचित्। लोके लोकाः। अधिको हरिः॥ का॥ अधिरीश्वरे। स्व

स्वामिसंबंधेऽधिः कर्मप्रवचनीयसंज्ञः स्यात् ॥ [illegible] ॥ यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्त
मी ॥ अधिकार्थेनेश्वरार्थेन च कर्मप्रवचनीययुक्ते सप्तमी स्यात् । उपपरार्धे हरेर्गुणाः । स्वात्
स्वामिनो वा विवक्षितः । अधिभुवि रामः । अधिरामे भूः ॥ [illegible] ॥ षष्ठी चानादरे । अनादराधिके भावल
क्षणे तायवतः षष्ठीसप्तम्यौ स्तः । रुदति रुदतो वा प्राव्राजीत् ॥ स्वामीश्वराधिपतिदायादसाक्षिप्र
तिभूप्रसूतैश्च । एतैर्योगे षष्ठीसप्तम्यौ स्तः । गवां स्वामी गोषु स्वामी ॥ [illegible] ॥ आयुक्तकुशलाभ्यां चासे
वायां । आभ्यां योगे षष्ठीसप्तम्यौ स्तः । तात्पर्यार्थे । आयुक्तः बालो वा हरिपूजने हरिपूजनस्य वा । तात्प
र्यार्थे किं । आयुक्तो गौः शकटे । ईषद्युक्त इत्यर्थः ॥ [illegible] ॥ यतश्च निर्द्धारणं । जातिगुणक्रियाभिरेकदेशा
विवेचनं यतः स्यात्ततः षष्ठीसप्तम्यौ स्तः । नृणां नृषु वा द्विजः श्रेष्ठः । गवां गोषु वा सत्ना गौर्बहुक्षीरा ।

गच्छतां गच्छत्सु धावन्त्वी ऋ॥६॥ पंचमी विभक्तौ। विभक्तवति निर्धारणार्थे पंचमी स्याद्वा। उदीच्याः
दाक्षिणात्येभ्यः श्रोत्रियाः॥७॥ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः। आभ्यां योगे सप्तमी स्याद्वा। मात
रि साधुर्निपुणो वा। अर्चायामिति किं। साधुर्भृत्यो राज्ञस्तत्त्वकथने। नाप्रतेरिति किं। साधुर्मातरं
प्रति। अप्रत्यादौ वाच्यं। साधुर्मातरं प्रति पर्यनु वा॥८॥ प्रसितोत्सुकाभ्यां तृतीया च। आभ्यां योगे तृ
तीया स्याद्वा चात्सप्तमी च। प्रसितः प्रसक्तः। प्रसित उत्सुको वा हरिणा हरौ वा॥९॥ नक्षत्रे च लुपि। लु
बन्तान्नक्षत्रात्तृतीया स्याद्वा। अधिकरणत्वात्सप्तमी स्याद्वा। पुष्ये पुष्येण वा गच्छेत्। पुष्ययुक्ते
काल इत्यर्थः। लुपि किं। पुष्ये शनिः। अकर्मकैर्धातुभिर्योगे वा देशो कालाध्वभावेष्वा द्वितीयेति केचि
त्। नदीं नद्यां वा वसति। रात्रिं रात्रौ वास्ते। क्रोशं क्रोशे वा वसति। यागं यागे वा तिष्ठति। इति विभक्त्य
र्थः॥ ॥ छ॥

समासश्चतुर्धा। अव्ययीभावस्तत्पुरुषो बहुव्रीहिर्द्वन्द्वश्चेति। पूर्वपदार्थप्रधा
नोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। द्विगुकर्मधारयौ तत्पुरुषभेदौ।
अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानो द्वन्द्वः। समासार्थविबो
धकं वाक्यं विग्रहः। छ। अव्ययं विभक्तिसमीपसमृद्धिवृद्ध्यर्थाभावात्ययासं
प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवच
नेषु। एष्वर्थेषु वर्तमानं सुबंतं समर्थं अव्ययं सुबंतेन समर्थेन नित्यं समस्यते
स समासोऽव्ययीभावसंज्ञः स्यात्। विभक्तिप्रमदः वचनग्रहणं प्रत्येकं मभिसंब
ध्यते। एकपद्यमैकस्वर्यं च समासप्रयोजनं। विभक्तौ तावदाहरौ अधिस्त्रे

तिविग्रहे। हरौ अधि इति विग्रहे॥ का॥ प्रथमानिर्दिष्टं समास उपसर्जनं। समासे उपसर्जनं
प्राक् प्रयोज्यं। इत्यधेः प्राक् प्रयोज्यं। सन्तद्धितेति प्रातिपदिकत्वं॥ का॥ सुपो धातुप्रातिपदिकयोः।
एतयोरवयवस्य सुपो लुक् स्यात्। ताच्छुत्पत्तिः॥ का॥ अव्ययीभावश्च। अव्ययीभावोऽव्ययं स्यात्॥
सुपो लुक्। अधिहरि। वृत्तात् तथा समर्थक्लिसंति सुप्णाद् हरौ अधिगछतात्। अत्रान न्वयान्नस
मासः। समीपे तस्यस्य उप। अत्रावसमासादि॥ का॥ नाव्ययीभावादतोम्त्वपंचम्याः। अदंतादव्य
यीभावान्न सुपो लुक्। तस्य पञ्चमी विना अमादेशः स्यात्। तत्तस्य समीपं उपकृष्णं। उपकृष्णात्
तः॥ का॥ तृतीयासप्तम्योर्बहुलं। अदंतादव्ययीभावात् तृतीयासप्तम्योर्बहुलम् अम्भावः स्यात्। उप
कृष्णं उपकृष्णेन कार्यं। उपकृष्णं उपकृष्णे स्थितं बहुलमिति क्वचित्स्यात्। क्वचिन्न स्यात्। क्वचि

त्रिषिद्धमपि स्यात्॥ क्वचिद्वा स्यात्॥ क्वचिदन्यस्यादित्यर्थः। तेन तु पस्तुनदं। उन्मत्तगांगं इत्यादौ
सन्नम्मानि त्यमम् नावस्यात्॥ समद्रो। मद्राणां समृद्धिः समुद्रं। व्यृद्धो यवनानां ऋद्धेर्विगमः। इर्षव
नं। अर्थासावे॥ का। अव्ययीभावश्च। अव्ययीभावो नपुंसकं स्यात्॥ क्लीबत्वाद्ध्रस्वता। मक्षिकाणा
मभावो निर्मक्षिकं। अत्यये। अतीतानि हिमानि निर्हिमं। असंप्रति नार्थे निद्राकालः। अ
तिनिद्रं नाद्य जाड्यतावाद्दरो इति इति हरि। इति दरि प्रकाशित इत्यर्थः। पश्चात् विष्णोः पश्चादनु
विष्णु। योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः। रूपस्य योग्यं अनुरूपं। विष्णुं विष्णुं
प्रति प्रति विष्णु। अनु सर्वे। ज्येष्ठमनुक्रमेणानुज्येष्ठं। योगपद्ये। का। अव्ययीभावे चाका
ले। सहस्य सः स्यादव्ययीभावे न तु काले। चक्रेण युगपद्धेहि धनुः। सचक्रं। कालेतु॥

सहस्रवद्धिं। सादृश्ये। हरेः सदृशं सहरि। यथार्थत्वेन सिद्धे गुणभूतेऽपि सादृश्ये स्यादि
ति पुनर्वचनं। सदृशः सख्या ससखि। संपत्तौ। क्षत्राणां संपत्तिः सक्षत्रं। ऋद्धेराधि
क्यं समृद्धिः। अनुरूप आत्मभावः संपत्तिरिति भेदः। साकल्ये। तृणेन सकलम
त्ति सतृणं। अंतवचने। अग्निग्रंथमपर्यंतमधीते साग्नि।। यथासादृश्ये। असादृश्यार्थो
यथाशब्दः सुपा नित्यं समस्यते। सादृश्यनिरासार्थं तत्। आत्मानमनतिक्रम्य यथात्मा तिष्ठत
हर्त्यं वा पथा हरस्तथा दृशि।। यावदवधारणे। यावदित्येतदवधारणेऽर्थे सुपा नित्यं सम
स्यते सोऽव्ययीभावः। यावंतः श्लोकास्तावंतोऽच्युतप्रणामाः। यावच्छ्लोकं।। सुप्प्रतिना मा
त्रार्थे। मात्रार्थे वर्तमानेन प्रतिना सह सुबंतं समस्यते सोऽव्ययीभावः। अस्त्यत्र किंचित्स्वल्पम

१८

ति। शाक प्रति मात्रार्थ इति किं वृक्षं प्र विद्योतते विद्युत्।छ। अपपरि बहिरंचवः पं
चम्याः। एते पंचम्या वा समस्यंते स शाकसंज्ञः। अप विष्णु संसारः। अपविष्णोः प
रि विष्णु परि विष्णोः। बहिर्वनं बहिर्वनात्। प्राग्वनं प्राग्वनात्।छ। आङ् मर्यादाभिवि
ध्योः। आङ् सीमाद्यर्थः पं चम्या वा समस्यते स शाकसंज्ञः। आमुक्ति संसारः। अ
भिविधौ आबालं हरिभक्तिः आबालेभ्यः।छ। लक्षणेनाभि प्रती आभिमुख्ये। वि
न्दुवाविनाशं सह अभि प्रती आभिमुख्यार्थे वा समस्यते स शाकसंज्ञः। अभ्यग्निं श
लभाः पतंति अग्निमभि अग्निं प्रति प्रत्यग्नि।छ। यस्य वा यामः। आयामो दैर्घ्यं य
स्य दैर्घ्यं वाचि अनुना लक्षणेन समस्यते स शाकसंज्ञः। अनुगंगं काशी। गंगादै

र्यंतादिकायां देर्यत्वस्यते।।६।। अनुर्यत्समया।। समया सामीप्ये। अनुर्यत्सामीप्यवाचीतेन सह समस्यते
सचाव्ययसंज्ञः। अनुवनमशनिर्गतः। वनस्य समीपे गत इत्यर्थः। अव्ययं विभक्तिसमीप इति सिद्धे पु
नर्वचनं विभाषार्थं।।७।। तिष्ठद्गुप्रभृतीनि।। कालविशेषे निपात्यंते। तिष्ठंति गावो यस्मिन् काले
विशेषे सति तिष्ठद्गु। खलेयवं लूनयवं।।८।। पारे मध्ये षष्ठ्या वा।। पारमध्येशब्दौ षष्ठ्या वा समस्यते सोऽव्ययी
भावः षष्ठीसमासापवादः। एतदंतत्वं चानयोर्निपात्यते। पारेगंगायाः पारेगंगं मध्येगंगायाः मध्येगंगं पक्षे तत्पुरुषः।।
गंगापारं। गंगामध्यं। महाविभाषया न वाक्यमपि। गंगायाः पारं। संख्या वंश्येन।। विद्यया जन्म
ना वा तद्वंतो वंश्याः तद्वाचिना संख्या वा समस्यते सचाव्ययसंज्ञः। द्वौ मुनी वंश्यौ द्विमुनि। त्रिमुनि व्याकर
णस्य। विद्यत्तौहि तामस्ते द विवक्षायां। त्रिमुनि व्याकरणं।।९।। नदीभिश्च।। नदीभिः संख्या समस्य १९

ते सोऽव्ययीभावः। समाहारे चायमिष्यते। सप्तगंगं। द्वियमुनं। छ। अन्यपदार्थे च संज्ञायां।
नदीभिः सह सुबंतं समस्यते अन्यपदार्थे नाम्नि। सोऽव्ययीभावः। उन्मत्तगंगं देशः। वा
धिकारेऽप्ययं नित्यसमासः। नहि वाक्येन संज्ञा गम्यते। नाम्नि किं। शीघ्रगंगो देशः।
छ। अव्ययीभावे शरत्प्रभृतिभ्यः। शरदादिभ्यष्टच् स्यात् समासांतोऽव्ययीभावे। उप
शरदं। प्रतिविपाशं। शरद्। विपाश्। अनस्। मनस्। दिव्। उपानह्। हिमवत्। अन
डुह्। दिश्। दृश्। विश्। चेतस्। चतुर्। त्यद्। तद्। यद्। कियत्। जराया जरस् च। उप
जरसं। प्रतिपरसमनुभ्योऽक्ष्णः। एभ्योऽक्ष्णः टच् स्यात् समासांतोऽव्ययीभावे। अ
क्षिशब्दात् इति लते न संज्ञायां। छ। तद्धिताः। अतः परं आपंचमाध्यायांतं ये प्रत्य
यास्ते तद्धितसंज्ञाः स्युः। छ। यस्येति यादि प्रत्यये। परोक्षमित्यत्र पारस्करादि

त्वा मुद्रा। श्रीभोजस्तु परःशब्दं निपातं मन्यते। सनत्वां अन्यत्र तौ॥ छ॥ अनश्वा। अनन्तं ताद
व्ययीभावादच् स्यात्॥ नस्तद्धिते। नांतस्य भस्य टेर्लोपः स्यात्तद्धिते। उपराजं। अध्यात्मं॥ छ॥ न
पुंसकादन्यतरस्यां॥ अन्नंतस्य क्लीबेतदंतादव्ययीभावादच्वा स्यात्॥ उपचर्मं। उपचर्म॥ छ॥
नदीपौर्णमास्याग्रहायणीभ्यः। एभ्यो वादच् स्यात्॥ उपनदं। उपनदि। उपपौर्णमासं। उप
पौर्णमासि। इत्यादि। छ। झयः। झयंतादव्ययीभावादच् वा स्यात्॥ उपसमिधं। उप
समित्॥ गिरेश्च सेनकस्य। गिर्यंतादव्ययीभावादच् वा स्यात्॥ सेनकग्रहणं पू
जार्थं। उपगिरं। उपगिरि॥ छ॥ इत्यव्ययीभावः॥ अथ तत्पुरुषः॥ छ॥ द्वितीया श्रिता
तीतपतितगतात्यस्तप्राप्तापन्नैः। द्वितीयांतं सुबंतं समर्थैः श्रितादिभिर्वा स
मस्यते स तत्पुरुषः। कष्टं श्रितः कष्टश्रितः। इत्यादि। गम्यादेरिष्टिः। ग्रामं गमी।

८१

अन्नं बुभुक्षुः अन्नबुभुक्षुः। सुखमीप्सुः सुखेप्सुः। तत्त्वं बुभुत्सुः समर्थं किं। पश्य
लक्ष्मं श्रितस्त्वं साधून्। छ स्वयं क्तेन। स्वयं क्तेन समस्यते तत्पुरुषः। स्वयंकृतं। स्वयं
नुत्तं। छ। खट्वा क्षेपे। खट्वा द्वितीयांता क्तेन समस्यते निंदायां स तत्पुरुषः। खट्वारू
ढो जाल्मः। छ। सामि। सामिकृतं। सामिपीतं। छ। ईषदकृता। ईषद्दित्यव्ययं अकृदंते
न समस्यते स तत्पुरुषः। ईषत्पिंगलः। छ। कालाः। कालवाचिनो द्वितीयांता क्ते
न समस्यंते अनत्यंतसंयोगेपि। मासप्रमितश्चंद्रः। छ। अत्यंतसंयोगे वा। क्ते
नेति निवृत्तं। कालवाचिनो द्वितीयांताः अत्यंतसंयोगे समस्यंते। मुहूर्तसु
खं। छ। तृतीया तत्कृतार्थेन गुणवचनेन। तृतीयांतं सुबंतं समर्थं तृतीयांत

र्थस्तत्गुणवचनेनार्थेन च समस्यते स तत्पुरुषः। शंकुलया खंडः शंकुला-
खंडः। धान्येनार्थः। धान्यार्थः। तज्जतेति किं। अक्ष्णा काणः। समर्थेति किं। नार्थः
शंकुलया खंडोऽस्यो ग्राक्षा। समर्था तु वृत्तिः। सर्वत्र समासे तद्धिते च ज्ञेया।
छाः पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः। एभिस्तृतीया सम-
स्यते। मासेन पूर्वो मासपूर्वः। एवं सदृशादौ। अवरस्येष्टिः। मासावरः। छाः क-
र्तृकरणे कृता बहुलं। कर्तरि करणे च या तृतीया सा कृदंतेन समस्यते बहु-
लं। हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। बहुलोक्तेः द्रहारूढ इ-
त्यादावपि स्यात्। दात्रेण लूनवान् एवमादौ च न स्यात्। छाः कृत्यैरधिकार्थवच-
ने। कर्तृकरणे वा या तृतीया तत्कृत्यैः समस्यते। स्तुतिनिंदाधिक्यारोपो काकपे

यानदी। बाष्पछेद्यानि तृणानि। तच्च ग्रहणे यण्य तोर्ग्रहणे। काकैःपातव्या नदी।
छा। अन्नेन व्यंजनं। व्यंजनवाचि तृतीयांतं अन्नवाचिना समस्यते। क्षीरेण
सिक्तः उदनः क्षीरोदनः छान्त द्रव्येण मिश्रीकरणं। मिश्रीकरणवाचि तृती
यांतं द्रव्येण समस्यते गुडेन मिश्रा धाना गुडधानाः। समासांतर्भूतत्वा क्रिया
द्वारेण सामर्थ्यमनयोः। तादर्थ्ये चतुर्थी तदर्थार्थ बलिहितसुखरक्षितैः। चतुर्थ्य
न्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थी वा समस्यते। तादर्थ्ये प्रकृतिवि
कारस्त्वावेव प्रवृत्तिः। यूपाय दारु यूपदारु। अन्यत्र रंधनाय स्थाली। अर्थेन नि
त्यसमासः सर्वलिंगता च। द्विजाय अयं द्विजार्थः सूपः। द्विजार्था यवागूः।

द्विजार्थं पयः । स्वतबलिः । गोहितं । गोसुखं । गोरक्षितं । ॥ पञ्चमी भयेन । पंचम्यंतं सुबंतं
भयवाचिना वा समस्यते । चोराद्भयं चोरभयं । भयभीतभीतिभीभिरिति वाच्यं । वृकभीतः । वृक
भीतिः । वृकभीः । बहुलोक्त्या ग्रामनिर्गतः । अधर्मजुगुप्सुरित्यादि ॥ अपेतापोढमुक्तपति
तापत्रस्तैरल्पशः । एभिः पंचमी कश्चित्समस्यते । सुखापेतः । सुखापेत इत्यादि । अल्प
श इति किं । प्रासादात्पतितः । इत्यादौ कश्चिन्न ॥ स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन ॥ एतानि पं
चम्यानि क्तेन समस्यंते । स्तोकान्मुक्तः । अल्पान्मुक्तः । एकमंतिकार्थदूरार्थयोः । दूरान्मुक्तः । पं
चम्याः स्तोकादिभ्य इत्यलुक् । ॥ षष्ठी ॥ षष्ठ्यंतं सुबंतेन सह वा समस्यते । सखाकसंबंधः स्यात्ताराज्ञ
ः पुरुषो राजपुरुषः । कद्योगलक्षणा षष्ठी समस्यत इति वाच्यं । षष्ठीसमासनिषेधस्यापवादः

व्या सन्तृतिः स्वारत अवणं। छा याजकादि निरुत्रा। एतैः षष्ठी समस्यते वक्ष्यमाण निषेधा
पवादः। द्विज याजकः। याजकः। पूजकः। परिचारकः। परिवेषकः। परिव्राजकः। परि
षेचकः। स्नातकः। अध्यापकः। आच्छादकः। उद्वर्त्तकः। होता। पोता। नेता। रथगणक
पत्ति गणकाः। छा। न निर्द्धारणे। निर्द्धारणे या षष्ठी सा न समस्यते। नृणां द्विजः श्रेष्ठः।
प्रतिपद विधान षष्ठ्या न समास इति वाच्यं। सर्पिषो ज्ञानं। छा। पूरण गुण सुहितार्थस
द्व्यय तव्य समानाधिकरणेन। एतदर्थैः सह षष्ठी न समस्यते। पूरणे। सतां षष्ठः। गु
णे। परस्य शौक्ल्यं। नाव प्रत्ययान्तो गुणवाची यत्र निषिध्यते। सदा गुणवाचिनो न निषे
धः। चंदनगंधः। सुहितार्थाः तृप्त्यर्थाः। फलानां तृप्तः। सत्। द्विजस्य कुर्वन्। सतीं कुर्वाणः। अ
व्ययं। सतां कृत्वा। तव्य सतां कर्त्तव्यं। तव्यता न वह्येवा। द्विज कर्त्तव्यता। समानाधिकर

लो। राज्ञो नलस्य। सति समासे पूर्वनिपाताऽनियमं स्यात्। कर्मधारयः स्याद्वा। छ। क्तेन च
पूजायां। पूजायां विहितक्तेन षष्ठी न समस्यते। पूजोक्तिरुपलक्षणं। राज्ञां मतः। बुद्धः। पू
जितो वा। छ। अधिकरणवाचिना च। क्तेन षष्ठी न समस्यते। इदमेषामासितं गतं भुक्तं वा
क्तेनेति निवृत्तौ। छ। कर्मणि वा। उक्तपक्षप्राप्तौ कर्मणि षष्ठ्या न समासः। विचित्रं गवां दोहो गो
पेन। छ। तृजकाभ्यां कर्तरि। कर्तृषष्ठ्यास्तृजकाभ्यां न समासः। भवतः शायिका। कर्तृवि
वक्षाभिधानात् तद्योगे कर्तृषष्ठी नेति तृजुक्तयोरर्थः। कर्तरि किं। इक्षुभक्षिका। कर्तरि वा
कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः। अपां स्रष्टा। वज्रस्य भर्त्ता। प्रत्ययार्थकर्तृशब्दस्य याज
कादित्वात् समासः। भूभर्त्ता। सतामर्थकः। छ। नित्यं क्रीडाजीविकयोः। षष्ठीसमासः। उद्दा
लकपुष्पभंजिका। जीविकायां। दंतलेखकः। तृजत्र नास्ति। छ। पूर्वापराधरोत्तरमेकदे
शिनैकाधिकरणे। पूर्वादयोऽवयववाचिनोऽवयविना समस्यंते एकं चेद्द्रव्यं। षष्ठीसमासाप

८३

पवादः। पूर्वं कायस्य पूर्वकायः। एकदेशिना किं। पूर्वं नाभेः कायस्य। एकाधिकरणे किं। पूर्वं छात्राणां।
सर्वोप्येकदेशोऽह्ना। समासः संख्याविसायेति ज्ञापकात्। मध्याह्नः। सायाह्नः। छ। अर्द्धं नपुंसकं।
समांशवाच्यर्द्धशब्दः क्लीबे च तथा समस्यते। अर्द्धं पिप्पल्याः। अर्द्धपिप्पली। क्लीबे किं। ग्रामा
र्द्धः। द्रव्यैक्ये एका। अर्द्धं पिप्पलीनां॥ छ। द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां। एतानि वात
द्धता पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठी समासः। द्वितीयं भिक्षाया। द्वितीयभि
क्षा। भिक्षाद्वितीयं। एवं तृतीयादि। तुरीयस्य शि तुरीयं भिक्षायाः। तुरीयभिक्षा। भि
क्षातुरीयं। छ। प्राप्तापन्ने च द्वितीयया। एते वा तद्धतोप हे द्वितीया समासः। प्राप्तो जी
विकां प्राप्तजीविकः। जीविकाप्राप्तः। आपन्नजीविकः। जीविकापन्नः। छ। कालाः

परिमाणिना। परिमाणवद्वाचिना कालेनः समस्यते। मासो जातस्य मासजातः। छ। सप्त
मी शौण्डैः। सप्तम्यंतं समर्थं शौण्डादिभिर्वा समस्यते। स तत्पुरुषः। अक्षेषु शौण्डः। अक्ष
शौण्डः। शौण्ड। धूर्त। कितव। व्याड। संवीत। अंतर। अधि। पटु। पंडित। कुशल। चपल।
निपुण। कर्तृकरणे कृता बहुलमिति बहुलोक्तेरन्यत्रापि द्वितीयादिविभक्तीनां
प्रयोगवशात्समासो ज्ञेयः। छ। सिद्धशुष्कपक्वबंधैश्च। एतैः सप्तमी समस्यते। स तत्
पुरुषः। कांपिल्यसिद्धः। आतपशुष्कः। स्थालीपक्वः। चक्रबंधः। छ। ध्वांक्षेण क्षेपे। ध्वां
क्षेण सप्तम्यंतं समस्यते क्षेपे वाच्ये स तत्पुरुषः। तीर्थध्वांक्ष इव तीर्थध्वांक्षः। अ
नवस्थित इत्यर्थः। छ। कृत्यैर्ऋणे। ऋणे वाच्ये सप्तम्यंतं समस्यते स तत्पुरुषः। मासे
देयं मासदेयं। ऋणं। ऋणग्रहणं नियोगोपलक्षणार्थं। पूर्वाह्णे गेयं साम। सप्तम्या। अ

त्तुक्त्वा॥छ॥ संज्ञायां॥ संज्ञायां विषये सप्तम्यंतं सुपा सह समस्यते स तत्पुरुषः। अरण्ये तिलकाः। नि
त्यसमास एवायं। नाद्देवाक्ये न संज्ञा गम्यते॥छ॥ तत्र॥ तत्रैत्येत क्तांतेन समस्यते स तत्पुरुषः। तत्रभुक्तं।
॥छ॥ क्षेपे॥ निंदायां सप्तम्यंतं क्तांतेन समस्यते स तत्पुरुषः। उदकेविशीर्णंति सुरूपेत्याति बहुलमित्य
नुकृ॥छ॥ पात्रेसंमितादयश्च॥ पात्रेसंमिताः॥छ॥ कुगतिप्रादयः॥ कुशब्दो गतिसंज्ञाः प्रादयश्च समर्थे
न नित्यं समस्यंते स तत्पुरुषः। गतिः। ऊरीकृत्य। समासत्वात् ल्यप्। अत्र सुप्सुपेत्यननुवृत्तेः
स्तिङापि समासः। ऊरीकरोति। प्रादि। प्रसंहेचाप्रत्तत्य। प्रकरोति। ऊर्यादिच्विडाचश्च॥ ऊर्या
दयश्च्व्यंता डाजंताश्च गतिसंज्ञाः स्युः। अनुकरणं। सत्। असत्। कारिका। अलं। अंतरं। कणेमनसी। पु
रः। अस्तं। अदः। तिरः। एषामव्ययानां प्रादीनां गति श्चेत्यादिभिः। सत्येरथविशेषप्रत्यये योगे गति
संज्ञा ज्ञेया॥छ॥ अच्छ गत्यर्थवदेषु॥ अच्छगत्य। अच्छगच्छति। अच्छोद्य। अच्छवदति॥ तिरसोऽपाये॥

त्वा। जोसा त्वा स्वस्त तय॥ ८॥ अनत्याधान उरसि मनसी॥ मध्ये पदे निवचने च॥ एते कृञि परे वि
भाषा॥ अनीत्यादीनि वा गतिसंज्ञाः॥ छ॥ तिरसोऽन्यतरस्यां॥ गतिसंज्ञस्य तिरसो विसर्जनीयस्य सो वा स्या
त्॥ कुघोः कृञो वा॥ तिरस्कृत्य तिरःकृत्य तिरः कृत्य इत्यादि॥ हस्ते पाणौ॥ प्राध्वं॥ जीविका॥ उपनिषत्सु
ते कृञि हस्ते पाणावित्यादि नित्यं गतिसंज्ञा ज्ञेयाः॥ हस्तेकृत्य इत्यादि॥ प्रादयो गताद्यर्थे प्रथमया॥
प्रगतश्चाचार्यः प्राचार्यः॥ प्रांतेवासी॥ अत्यादयः क्रांताद्यर्थे द्वितीयया॥ अतिक्रांतो मालां इति विग्रहे॥
एकविभक्ति चापूर्वनिपाते॥ विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात्॥ न तु तस्य पूर्वनिपातः॥ गो
स्त्रियोरुपसर्जनस्य॥ गोऽन्तस्त्रीप्रत्ययान्तयोरुपसर्जनयोर्ह्रस्वः स्यात्॥ अतिमालः॥ अतिगंगः॥ विभाषा
गुणवचनेरई पिप्पल्यादौ नोपसर्जनत्वं॥ स्त्रीप्रत्ययान्तत्वाभावात्॥ अतितंत्रीः॥ अतिलक्ष्मीः॥ अतिश्रीः॥
श्र्यादौ ह्रस्वो न॥ ईयसो बहुव्रीहेर्न॥ बहुश्रेयसी॥ ग्रामः॥ अवादयः क्रुष्टाद्यर्थे द्वितीयया॥ अवक्रुष्टः

कोकिलया ऽव कोकिलः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। परिग्लानोऽध्ययनाय पर्यध्ययनः।
ऽलं कुमार्यै ऽलं कुमारि। निरादयः क्रांताद्यर्थे पंचम्या। निःक्रांतः कौशांब्याः। निःकौशांबिः।
निर्वाराणसिः। इवेन विभक्त्यसमासो नित्यलोपः। पूर्वपदप्रकृतिस्वरत्वं च। वाससीव।
ह्रादिप्रसंगो कर्मप्रवचनीयानां न समासः। वृक्षं प्रति। छा। पूर्वकालैकसर्वजरत्पुराणनवकेव
लाः समानाधिकरणेनाऽऽ ते समानाधिकरणेन समस्यंते स तत्पुरुषः। पूर्वकालार्थश्च परकाला
र्थेन। स्नातानुलिप्तः॥ छा तत्पुरुषः समानाधिकरणः कर्मधारयः। समानाधियो यस्तत्पुरुषः। क
र्मधारयाख्यः। छा पुंवच्च कर्मधारयजातीयदेशीयेषु। कर्मधारये जातीयदेशीययोश्चापरतो ऽभाषि
तपुंस्कं मनकं तं शर्वं पुंवन्न्यात्। पुंवत्त्वात् स्त्रीप्रत्ययलोपः। इकारासो ऽटीव ए कारादी। को

पधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ इष्यते। पाचिका चासौ स्त्री च पाचकस्त्री॥
पंचमभार्यादि दत्तभार्या। शोभनभार्या। सुकेशभार्या। ब्राह्मणभार्या। पाचकजातीया पाचकदेशी
या इत्यादि। सर्वदेवाः जरत्पतिः इत्यादि। उपमानानि सामान्यवचनैः। उपमानोपमेयैकध
र्मवचनैरुपमानानि समस्यन्ते। घन इव श्यामो घनश्यामः। ॥ उपमितं व्याघ्रादिभिः सा
मान्याप्रयोगे। उपमेयमुपमानैर्व्याघ्रादिभिः समस्यते सामान्याप्रयोगश्चेत्। पुरुषो व्याघ्र इव
पुरुषव्याघ्रः॥ व्याघ्रसिंह। बाहस्ता। हस्ती। ऋषभ। नागपुंगव। पुष्पपल्लव। कुंजर। लता। बिडमृगादयः॥
सामान्याप्रयोगे किं। पुरुषो व्याघ्र इव शूरः॥ विशेषणं विशेष्येण बहुलं। भेदकं सुबन्तं भेद्येन समा
नाधिकरणेन सुबन्तेन बहुलं समस्यते। रक्तता बहुलोक्तेः कृष्णसर्प इत्यादौ नित्यं क्वचित्तो

द्विः। रामो जामदग्न्यः। अर्जुनः कार्तवीर्यः। इत्यादौ न। क्वचिदानीलमुत्पलं॥ ६५ कुत्सितानि कुत्सनैः॥
कुत्सितवचनानि सुबंतानि कुत्सन वचनैः समस्यंते स तत्पुरुषः। बाह्यप्रवृत्ति निमित्त कुत्सायामयं
समास इष्यते। वैयाकरणखसूचिः। निःप्रतिभ इत्यर्थः। याज्ञिककितवः। ६६। पापाणके कुत्सितैः। पा
पाणकशब्दौ कुत्सनाभिधायिनौ कुत्सितैः सह समस्येते। पापकुलालः। अणकनापितः। याजकपार्थि
वादीनामुत्तरपदलोपश्च। याजकप्रियः। पार्थिवः याजकपार्थिवः। देवपूजको ब्राह्मणः देवब्राह्म
णः॥ ६७ नञ्॥ नञ्समर्थेन सुपा समस्यते॥ नलोपो नञः। नञो नस्य लोपः स्यादुत्तरपदे। अ
तस्मान्नुडचि। तस्माल्लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अश्वादन्यो नश्वः॥
धर्मविरुद्धो धर्मः। पापत्वा बो पापं नञो नलोपस्तिङिष्यते। अपचसि त्वं जाल्म। निषेधार्थ

नकारस्यासमासत्वान्नणो भावोनेकधेत्यादौ ज्ञेयः॥छ॥ आन्महतः समानाधिकरणजातीययोः। महत
आकारान्तादेशः स्यात्। समानाधिकरणे जातीये च परे। महादेवः। घासकरविशिष्टेष्विति वाच्यं। जा
तीयघासादौ तीकादस्याप्यात्वं। महत्या घासो महाघासः महाकरः। महाविशिष्टः॥छ॥ दिक्संख्ये
संज्ञायां। दिक्वाचिनः शब्दाः संख्यावाचोत्तरपदेन समानाधिकरणेन समस्यंते संज्ञायां विषये स त
त्पुरुषः। पूर्वा चासौ दिक् पूर्वदिक्। सप्तर्षयः॥छ॥ तद्धितार्थोत्तरपदसमाहारे च। तद्धितार्थविष
ये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये एकार्थेन समस्यते स तत्पुरुषः। पूर्वस्यां शा
लायां भव इति विग्रहे दिक्पूर्वपदात्संज्ञायां ञः। अस्मात् द्विवाद्यचोञिः स्यादसंज्ञायां। कर्मधारये पुं
वद्भावे च सति तन्निमित्तात् आदिवृद्धिः पौर्वशालः। उत्तरपदात् पूर्वशालाप्रियः। द्विगुसमाहारो ना

स्तिः॥ ५६ ॥ संख्यापूर्वो द्विगुः। तद्धितार्थत्रिकोक्तस्त्रिविधः संख्यापूर्वो द्विगुसंज्ञः स्यात्। पंचसु कपाले
षु संस्कृत इति विग्रहे॥ ५७ ॥ संस्कृतं भक्षाः। सप्तमीसमर्थात् संस्कृतार्थे यथाविहितः प्रत्ययः स्या
त्। भक्षाश्चेद्वाच्याः स्युः। इत्यण्॥ द्विगो विभक्तिलोपे वक्तता ॥ ५८ ॥ द्विगोर्लुगनपत्ये। द्विगोर्निमि
त्तं यस्तद्धितोऽनपत्यार्थः प्राक्दीव्यतीयस्तस्य लुक् स्यात्। पंचकपालः पुरोडाशः। अनपत्ये किं
। द्व्योर्मित्रयोरपत्यं द्वैमित्रिः। पंचभिर्गोभिः क्रीत इत्यत्र द्विगोत्तरता ॥ ५९ ॥ तेन क्रीतं। तेनेति तृतीया
समर्थात्क्रीतार्थे यथाविहितं प्रत्ययः स्यात्। इति ठक्। अध्यर्धपूर्वद्विगोर्लुगसंज्ञायां। अध्यर्ध
पूर्वस्य द्विगोश्च परस्यार्हीयप्रत्ययस्य लुक् स्यात् असंज्ञायां। पञ्चगुः। उत्तरपदात् पंचगावो धन
नं यस्येत्यत्र द्विगोत्तरता ॥ ६० ॥ गोरतद्धितलुकि। गोन्तात्तत्पुरुषाट्टच् स्यात् असमासान्तः। न तु तद्धित

स्तु किं। अव्यादेशः। ततो बहुव्रीहिः पंचगवधनः। समाहारे। पंच गावः समाहृताः। इत्यत्र स
मासांतेच्चतोऽच्। द्विगुरेकवचनं। द्विगोरर्थः समाहारे एकवत्स्यात्। सन पुंसकः। यस्येकवद्भा
वः स नपुंसकः स्यात्। पंचगवं। द्विगोरन्यत्र। परमगावः। देवगावः। देवगवी। अकारांतोत्तरपदो
द्विगुः स्त्रियां भाष्यते। द्विगोरिति ङीप्। त्रिलोकी। आबंतो वा। त्रिखट्वं। त्रिखट्वी। अनो नलो
पश्च वा स्त्रियां। पंचकर्म्मी। पंचकर्म्मी। पात्राद्यंतेन। पंचपात्रं। चतुर्युगं। त्रिभुवनं। छात
स्तु रूपस्यांगुलेः संख्याव्ययादेः। संख्याव्ययादेरंगुल्यंतस्य तत्पुरुषस्याच् प्रत्ययः स्यात्। द्वे
अंगुली प्रमाणमस्य द्व्यंगुलं। निर्गतमंगुलिभ्यः निरंगुलं। तत्पुरुषस्येति किं। पंचांगुलिर्हस्तः।
अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः। एभ्यो रात्रेरच् स्याच्चकारात् संख्याव्ययादेः। अहश्च रात्रि

अत्र अहोरात्रौ। द्वंद्वैकवद्भावः। एकवद्भावात्। क्लीबत्वात् तत्र तत्पुरुषः। परवल्लिंगमिति स्त्रीत्वे प्राप्ते।
रात्राह्नाहाः पुंसि। एते तत्पुरुषस्यैवाः। सर्वरात्रिः सर्वरात्रः। एकदेशः। पूर्वरात्रिः पूर्वरात्रः। अपररा
त्रः। अपररात्रः। संख्यातरात्रः। पुण्यरात्रः। द्विरात्रः। अतिरात्रः। राजाहःसखिभ्यष्टच्। एतदंता
त्तत्पुरुषात् टच् स्यात्। महाराजः। अतिराजः। अतिराजी। सुसखः। महासखः। त्रिसखः। ह्वा। अह्न
ष्टखोरेवा। अह्नष्टखोरेव टिलोपः स्यान्नान्यत्र। उत्तमाहः। व्यहः। देवाहनी। ततो घ्नहीनः। अह्नः
खः क्रतुसमूहे। अहीनः क्रतुः। नियमः किं। आह्निकं। पुनर्निर्देशाद्वेदे। मजाणां राज्ञी महिषी॥ ७॥
अह्नोह्न एतेभ्यः। एभ्यः सर्वादिभ्यः परस्याहन् शब्दस्याह्नादेशः स्यात्। टचि परे। अह्नोदन्तात्। अ
अदन्तात् सर्वपदस्थाद्विमित्तात् परस्य अह्नो नस्य णः स्यात्। सर्वाह्णः। पूर्वाह्णः। संख्याताह्नः। द्वयोरह्नो

भ

न्यविश्वकः। अश्वोऽलुकु। अल्पकः। प्रियः। अल्पकः। अन्दंतादित्युक्ते नेदि एतचैव निरकः। अक्षकः। त्यदं
तग्रहणान्नेह हीबल्कीप्रावट्टा। ७। न संख्यादेः समाहारे। अह्नादेशो न। द्व्यह्नी समाहृतोव
ह्नः। द्व्यहः। ८। उत्तमैकाभ्यां च। आभ्यां परस्य अह्नादेशो न स्यात्। उत्तममन्त्यं पुण्यमित्यर्थः। पुण्याहमा
हः। पुण्यसुदिनाभ्याम् अह्नः क्लीबतेष्यते। पुण्याहं। सुदिनाहं। एकाहः। संख्यातादिः। इत्यपीष्यते।
।। ९। अग्राख्यायामुरसः। उकारोन्तात्तत्पुरुषाट्टच् स्यादग्राख्यायां। अश्वोरसं। मुख्योऽश्व इत्यर्थः।
।१०। अनोश्मायःसरसां जातिसंज्ञयोः। एतदंतात्तत्पुरुषाट्टच् स्यात् जातौ संज्ञायां च। उपानसं। अ
मृताश्मः। कालायसं। मंडूकसरसं। इति जातिः। महानसं। पिंडाश्मः। लोहितायसं। जलसरसं। इति
संज्ञा। ११। ग्रामकौटाभ्यां च तक्ष्णः। आभ्यां तक्ष्णः टच् स्यात् तत्पुरुषे। ग्रामतक्षः। कौटतक्षः। १२। अ

तः श्वनः । अन्यतः परस्य श्वन इत्वं स्यात् । अतिश्वो वराहः । अतिश्वा सेवा । उ
उपमानादप्राणिषु । उपमानवाचिनः श्वन इत्वं स्यादप्राणिषु । आक
र्षः श्वेव आकर्षश्वः । अप्राणिषु किं । वानरः श्वेव वानरश्वा । उपमितं
व्याघ्रेति समासः । उत्तरमृगपूर्वाच्च सक्थ्नः । एभ्यः परस्य सक्थ्न इत्वं स्या
त् । वा उपमानाच्च । उत्तरसक्थं । मृगसक्थं । उपमानात् फलकसक्थं । द्वि
नावो द्विगोः । नौशब्दान्ताद् द्विगोरित्वं स्यात् । द्वे नावौ समाहृते द्विनावं ।
त्रिनावं । पंचनावप्रियः । न द्विनार्थी द्वाभ्यां नौभ्यामागतः । द्विगोर्लुगि
नपत्य इत्यत्र वेत्यनुवृत्तेरत्र न द्विगुर्नत्वाल्लुक् । द्विनावरूप्यः ।३

वमनुष्ये स्यइति रूप्यः। अतद्धितलुकीत्येव। पंचभिर्नौभिः क्रीतः। पंचनौः॥ ७॥ अर्द्धाच्च॥
अर्द्धात्परतो नावष्टच्स्यात्। नावः अर्द्धं। अर्द्धनावं। क्लीबत्वं लोकात्॥ ८॥ खार्याः प्राचां॥ द्विगोरर्द्धा
च्च खार्याष्टच् वा स्यात्। द्विखारं। द्विखारि। उत्तरपदे। द्विखारधनः। द्विखारीधनः। अर्द्धखारं।
अर्द्धखारी॥ ९॥ द्वित्रिभ्यामञ्जलेः॥ आभ्यामञ्जलेष्टच्स्यात्। द्व्यंजलं। द्व्यंजलि। अतद्धितलु
कीत्येव। द्वाभ्यामंजलिभ्यां क्रीतः द्व्यंजलिः॥ १०॥ ब्रह्मणो जानपदाख्यायां॥ ब्रह्मांतात्तत्पुरुषाट्ट
च्स्यात्। जनपदसंबंधत्वद्योतकं चेदुपपदं। ब्रह्मणो जनपदस्य संबंधस्य द्योतकमित्यर्थः। सुराष्ट्रे
ब्रह्मा सुराष्ट्रब्रह्मः। नस्तद्धित इति टिलोपः। सप्तमीति योगविभागात्समासः॥ ११॥ कुमहद्भ्यामन्य

१०

तरस्यां॥ १२॥ आभ्यां ब्रह्मणो वा टच्स्यात्तत्पुरुषे। कुब्रह्मः। कुब्रह्मा। महाब्रह्मः। महाब्रह्मा॥ १३॥ ततोऽप

पदंसप्तमीस्थं।अस्मिन्धात्वधिकारेकर्मण्यणित्यादौसप्तमीनिर्दिष्टंउपपदसंज्ञंस्यात्।
३।उपपदमतिङ्।उपपदमतिङन्तंसमर्थेननित्यंसमस्यते।सतत्पुरुषः।कुंभका
रः।अतिङ्।किं।एधानाहारकोव्रजति।तुमुन्ण्वुलौक्रियायांक्रियार्थायामितिसप्तमीनिर्दि
ष्टात्तिङन्तस्योपपदत्वं।अतिङ्वचनाज्ज्ञापयतिचनात्रसुबन्तंदृत्तिरितितेनगतिकारकोप
पदानांकृद्भिःसमासःप्राक्सुबुत्पत्तेरितिसिध्येत्।अश्वेनक्रीतअश्वक्रीती।।३।अमैवाव्य
येन।उपपदसमासोऽव्ययेनामैवस्यात्।स्वादुंकारंभुंक्ते।अमाकिं।कालोभोक्तुं।केवलस
माश्रयमुपपदंत्वान्यत्।अग्रेभोजं।अग्रेभुक्त्वाइत्यादौनसमासः।।४।।तृतीया
प्रभृतीन्यन्यतरस्यां।उपदंशस्तृतीयायामित्यतःप्रभृतीन्युपपदानिअमावासमस्यंते।
मूलकोपदंशंमूलकेनोपदंशंभुंक्ते।।५।।क्त्वाच।क्त्वोपपदानितृतीयाप्रभृतीनिक्त्वाप्रत्य
नो

येनवासमम्यंते।समासत्वादत्वत्यय।उच्चैः कृत्य। नीचैः कृत्य।उच्चैः कृत्वा।वृती याद्वन्वृती न्येव।
।।छ।। ।।उपंचौपक्रमंतदाद्याचि।ख्यासायां।उपज्ञोपक्रमयोरादेशप्याने छायंतदेतत्स्या
सुरूषोनपुंसकंस्यात्।पाणिनेरूपज्ञापाणिन्यूपयंग्रंथः।तेनादौकृतइत्यर्थः।नंदस्योप
पक्रमोनंदोपक्रमंद्रोणः।तेनादावुपक्रांतइत्यर्थः।छ। ।।छायाबाहुल्ये।छायांतसुरूषः।
सर्वपदार्थबाहुल्येक्लीवंस्यात्।शलनानांछायांशलनछायां।छ। ।।सन्ताराजा।मनुष्यपू
र्वा।राजामनुष्यपूर्वःसन्तातस्तसुरूषःक्लीवंस्यात्।इनसन्तं।ईश्वरसन्तं।पर्यायस्येवेष्य
ते।इनेन।राजसन्ता।अमनुष्यत्वाद्रोरूपारक्षःपिशाचादीनाद्।रक्षःसन्तं।राजामनुष्यपूर्वा
चिं।चंद्रगुप्तसन्ता।अशाल्नाच।संघातार्थी।सन्तातत्सुरूषेक्लीवंस्यात्।स्त्रीसन्तं।स्त्रीसंघा
तइत्यर्थः। अशालेतिकिं।धर्मसन्ता।धर्मशालेत्यर्थः।।छ। विन्नाजासेनासुराछायाशा ८१

शालानिशानां। एतदंतस्तत्पुरुषो वा क्लीबं स्यात्। द्विजसेनं। यवसुरं। कुड्यस्य छाया कुड्यछायं। गोशालं।
शुश्वनिशं। पक्षे द्विजसेनेत्यादि॥छ॥ तत्पुरुषो नञ्कर्मधारयः। नञ्समासं कर्मधारयं च हित्वान्यस्तत्
पुरुषः क्लीबं स्यात्। इत्यनुवृत्तेर्नेदं। दृढसेनो राजा। असेना। परमसेना॥छ॥ परवल्लिंगं द्वंद्वतत्पु
रुषयोः। इतरेतरयोगे द्वंद्वस्य तत्पुरुषस्य च परवल्लिंगं स्यात्। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटावि
मौ। तत्पुरुषो। अर्द्धपिप्पली। द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न। पंचकपालः। प्राप्तजीविकः।
आपन्नजीविकः। अलंजीविकः। निष्कौशांबिः॥छ॥ पूर्ववदश्ववडवौ। एतयोर्द्वंद्वः पूर्ववल्लिंगं स्यात्।
अश्ववडवौ। पक्षे एकवद्भावो वक्ष्यते। द्वित्वमतंत्रं। अश्ववडवान्। क्रियाव्ययविशेषणानां क्लीब
त्वमेकवचनांतत्वं वाच्यं। सानंदं नमति हरिं। प्रातः कमनीयं। पथः संख्याव्ययादेः क्लीबता। त्रिपथं।
विपथं॥छ॥ अपथं नपुंसकं। अपथानि व तत्पुरुष एव। अवपथा नगरी। आसमदतदत्यत्र आ
द्वितीयागविन्नागातव्यात्वा। प्राकेकादशतो निर्द्देशाद्वा। एकाधिकादशा एकादशा॥छ॥ वृष्णः

संख्यायामबहुव्रीह्यशीत्योः। संख्यायामुत्तरपदे द्वि अष्टनोरात्वं स्यात्। द्वाधिका दश द्वादश। द्वा
द्वाविंशतिः। द्वात्रिंशत्। अष्टादश। अष्टाविंशतिः। अष्टात्रिंशत्। अबहुव्रीह्यशीत्योः किं। द्वि
त्राः। द्व्यशीतिः। आकृत्वातात्प्रयोगः। नेह। द्विशतं। अष्टशतं। अष्टनः कपाले हविषि। अष्टाक
पालः। चरौ च। गविच युक्ते। अष्टागवेन शकटेन। त्रेस्त्रयः। त्रेस्त्रयपदं त्यादेशः स्यात्।
सर्वविषयार्थ यो दशा त्रयोविंशतिः। त्रयस्त्रिंशत्। अबहुव्रीह्यशीत्योः। त्रिदशाः। त्र्यशीतौ। त्र्य
शीतिः। आकृत्वातादित्येवा त्रिशतं त्रिसहस्रं। विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां। द्वि अष्ट
न् त्रि एषां आत्वं पुर्कं वा स्यात्। चत्वारिंशदादौ परे। द्विचत्वारिंशत्। द्वाचत्वारिंशत्। अष्टचत्वा
रिंशत्। अष्टाचत्वारिंशत्। त्रिचत्वारिंशत्। त्रयश्चत्वारिंशत्। एवं पञ्चाशत्षष्टिसप्तति
नवतिष्वपि। एकादिश्चैकस्य चादुक्। एकादिर्नञ्प्रकृत्या स्यात्। एकस्य चादुगागमश्च। ए ए२
केन न विंशतिः। एकान्नविंशतिः। इतीयेति योगविभागात्समासः। अननुनासिकावि

कल्यपक्षे। एकादूनविंशतिः। एकोनविंशतिरित्यर्थः। एवं एकान्नत्रिंशदादिषु। षष उत्वं द
तृदशासूत्तरपदादेः ष्टुत्वं च धासु वा स्यादिति वक्तव्यं। षडधिका दश षोडश। षोढा। षोड
न्। षड्धा इति तत्सु रूपः।। अनेकमन्यपदार्थे। अनेकं सुबंतं अन्यपदार्थे वर्तमानं वा सम
स्यते स बहुव्रीहिः।। सप्तमीविशेषणे बहुव्रीहौ। सप्तम्यंतं विशेषणं च बहुव्रीहौ पू
र्वं प्रयोज्यं। अप्रथमाविभक्त्यर्थे। प्राप्तमुदकं यं ग्रामं स प्राप्तोदको ग्रामः। ऊढरथो
नड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्थाली। पीतांबरो हरिः। वीरपुरुषो ग्रामः। प्र
थमार्थे तु वृष्टे देवे गतः। अनेकोक्तेर्बहूनामपि। नीलमुज्ज्वलं वपुर्यस्य स नीलोज्ज्वल
वपुः। समानाधिकरणानां बहुव्रीहिरिष्यते। नेह। पंचभिर्भुक्तमस्य। अव्ययानां चो
च्चैः। उच्चैर्मुखः। सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च। करेस्थितं धनं यस्य

सो करधनः । खरस्य मुखमिव मुखं यस्यासौ खरमुखः ॥ छ ॥ संघातविकारषष्ठ्याश्चोत्तरपद-
लोपश्च ॥ केशानां संघातश्चूडा यस्यासौ केशचूडः । सुवर्णस्य विकारोऽलंकारो यस्यासौ सुव-
र्णालंकारः ॥ छ ॥ प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च ॥ प्रपतितपर्णः प्रपर्णः ॥ वि-
गतार्थं वचनं ॥ छ ॥ नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपश्च ॥ अविद्यमानभार्यः अभार्यः ॥ छ ॥
अस्तिक्षीरादयश्च ॥ अस्तिक्षीरा गौः ॥ छ ॥ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिक-
रणे स्त्रियामपूरणीप्रियादिषु ॥ छ ॥ उक्तपुंस्कादनूङ् स्त्रीप्रत्ययस्य पुंवत्स्यात् । एकार्थे स्त्री-
लिंगे पदे परे । न तु पूरणीप्रियादौ च परतः । पुंवद्भावात् स्त्रीप्रत्ययलोपः । गोस्त्रियोरिति पर-
पदस्य ह्रस्वः । चित्रगुः । रूपवद्भार्यः । उक्तपुंस्कात् किं । गंगाभार्यः । अनूङः किं । वामोरू-
भार्यः । पूरण्यां तु ॥ छ ॥ अपूरणीप्रमाण्योः । पूरणीप्रत्ययांतात् प्रमाण्यंताच्च बहुव्रीहेः

ए ३

पुंस्यात्। कल्याणी पंचमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः। स्त्री प्रमाणाः। पुंव
त्वोव निषेधो। पू प्रत्ययस्य प्रधानपूरण्यामेवा। रात्रिः पूरणी वाच्या चेत्तत्र मुख्यत्वं॥ छं।
नघ्न तस्यानघंत्वादुदहृता च बहुब्रीहेः कपुंस्यात्। पुंवद्भावः। कल्याणपञ्चमीकः पक्षः। ब
हुकर्तृकः। प्रियादिषु कि। कल्याणी प्रियः। प्रिया मनोज्ञा। कल्याणी। सुभगा। दुर्भगा।
भक्तिः। सचिवा। स्वसा। कांता। क्षांता। समा। चपला। उ दुहिता। वामना। वामा। तनया। ठे हे भक्ति
रिला दिभजना देर्द्वर्थमात्रं विवक्षितं न स्त्रीत्वं। छ। तसिलादिषु त्वतलसुचः। तसिलादिषु
चेत्वसुच्पर्यन्तेषु परेषु स्त्रियाः पुंवन्स्यात्। ततः। ततमः। तत्त्वमो। पटुतरा। पटुतमा। एवं
चरट्। जातीय। कल्पदेश्य देशीय। रूप्य। पाशादौ। त्वतलोर्गुणवचनस्येति वाच्यं॥
पट्वीभावः। पटुत्वं। पटुता। नेह। कठीत्वं। उत्तरसूत्रे चकारात्तसिल्लल सुजनं तर्त तिथादि

बाला

पुंवद्भावः। अत्रांदेहि। अत्यन्ताः। बहुत्राः। तस्मादेपुंवद्भावः। हस्तिनीनां समूहो हास्ति
कं। अग्रे किरोहिणेयः॥ छा॰ ठक्छसोश्च। भवत्याः छात्राः। भावत्काः। भवदीयाः। कु
क्कुट्यादिष्वण्डादिषु परेषु पुंवद्भावो वाच्यः। कुक्कुट्याः अण्डं कुक्कुटाण्डं। मृगपदा मृग
क्षीरं। काकशावः॥ छा॰ क्यङ्मानिनोश्च। एतयोश्च परतः पुंवत्। एनीवाचरतीति एताय
ते। श्येतायते। दर्शनीयां मन्यते दर्शनीयमानिनी॥ छा॰ न कोपधायाः। कोपधायाः न के
पुंस्कस्त्रियाः पुंवन्न स्यात्। पाचिकाभार्यः। पाचिकाता। पाचिकात्वं। रसिकाभार्यः। मद्रि
कायते। मद्रिकामानिनी॥ छा॰ अकतद्धिताभ्यां कोपधायाः पुंवत्प्रतिषेधो न वक्तव्यः। इह
माभूत्। पाकाभार्या यस्य स पाकभार्यः॥ छा॰ संज्ञापूरण्योश्च। अनयोर्न पुंवत्। दत्ताभार्यः। द
त्तायते। दत्तामानिनी। पञ्चमीभार्यः। पञ्चमीपाशेत्यादि॥ छा॰ • वृद्धिनिमित्तस्य च तद्धित

स्यारक्तविकारे। वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्य पुंवन्न स्यात्। स्रौघ्नी नार्यः।
माथुरीयते। माथुरीमानिनी। अरक्ते किं। काषायी कंथा यस्य स काषायकंथः। अविकारे
किं। हैममुद्रिकः। वृद्धिनिमित्तानावादिरपुंवत्। वैयाकरणनार्यः। सौवृघ्ननार्यः। छ।
स्वांगाच्चेतो मानिनि। स्वांगादीकारस्य स्त्रियां विहितस्य पुंवन्न स्यात्। सुकेशी नार्यः। स्वा-
गात्किं। पटु नार्यः। इतः किं। अकेशा नार्यः। अमानिनि किं। सुकेशमानिनी। छ। जाते च।
जाते विहितो ङीष् पुंवन्न स्यात्। ब्राह्मणी नार्यः। अमानिनीत्येव। ब्राह्मणमानिनी। छ। सं-
ख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये। संख्येयार्थया संख्यया अव्ययादयः सम-
स्यन्ते। स बहुव्रीहिः। छ। बहुव्रीहौ संख्येये डजबहुगणात्। संख्येयया बहुव्रीहिस्तस्मा-
त् डच् स्यात्। न तु बहुगणात्। टिलोपः। उपगता दश येषां ते उपदशाः। छ। ति विंशतेर्डि-
ति। विंशतेर्नस्य ति शब्दस्य लोपः स्यात् डिति। आसन्नविंशाः। अदूरत्रिंशाः। अधिकच-

चात्वारिंशाः। द्वौ त्रयो वा मानं येषां ते द्वित्राः। बहुगणो किं। उपबहवः। उपगणाः। अत्र स्वरे विशे
षः। संख्येये किं। अधिका विंशतिर्गवां। संख्यायास्तत्पुरुषस्य डच्। निर्गतानि त्रिंशतः। नि
स्त्रिंशानि वर्षाणि चैत्रस्य। निश्चत्वारिंशानि। निर्गतस्त्रिंशतो अंगुलीभ्यः। निस्त्रिंशः। षड्
॥छ॥ दिग्नामान्यन्तराले। दिशां नामानि सुबन्तानि समस्यन्ते अन्तराले वाच्ये। सब
हुव्रीहिः। सर्वनाम्नः समासे पूर्वं पुंवत्त्वात् दक्षिणपूर्वा। अनयोरन्तरालमित्यर्थः। ना
मात्केरैन्द्र्यादीन॥ तत्र तेनेदमिति सरूपे। सप्तम्यन्ते ग्रहणविषये सरूपे पदे च त
थार्थे तृतीयान्ते सरूपे प्रहरणे इदं युद्धमित्यर्थे मिथः समस्यन्ते कर्मव्यतिहारे द्योत्ये।
इति शब्दादेतावल्लभ्यते॥छ॥ अन्येषामपि दृश्यते। अन्येषां नाप्ययामपि [illegible] दृश्यते।
दृग्रहणात् कर्मव्यतिहारे बहुव्रीहौ पूर्वपदस्य दीर्घत्वमाप्यमनयीति शेयं॥छ॥ इच्
कर्मव्यतिहारे। कर्मव्यतिहारबहुव्रीहेरिच् स्यात् समासान्तः। निष्ठकुप्र न्वती

१५

निचेत्यव्ययीभावादव्ययत्वं।द्वन्द्वत्वपस्य तत्र पाठात्।केचित्तु गृहीत्वा ददं सुदं त्रवृत्तौ।के
शाकेम्शि।दं दैभ्य दं दैभ्य त्रत्येदं सुदं त्रवृत्तौ।दं उ।दं उ सुष्ठा सुषि।सुष्ठी सुषि।।क।उर्गुणाः
उवर्णान्तस्य तस्य गुणः स्यात्।अव्वादेशः।बाहू बाहू विबा।बाहू बाहू विबाउ रिति वक्तव्ये
गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति यथास्यात्।तेन स्वायंभुवं धाम सिध्येत्।अविबाउ।।
ख्यस्यासि।सरूपेक्ति।हलमुच्चालेन।।क।तेन सहेति तुल्ययोगे।सहेत्येतच्छुतीयां तेन सम
स्यते तुल्ययोगे स बहुव्रीहिः।।क।वोपसर्जनस्य।उपसर्जनस्य सहस्य सः स्याद्वा।सह
पुत्रेण सपुत्रः।सहपुत्रो वा आगतः।तुल्ययोगवचनं प्रायिकं।सकर्मकः।सलोमकः।
।।क।बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्।स्वांगार्थयोरनयोः षच् स्यात्।बहुव्रीहौ।दीर्घसक्थः।
।पुंडरीकवदक्षिणी यस्यासौ पुंडरीकाक्षः।जलजाक्षी।स्वांगात्किं।दीर्घसक्थि।शकटं।स्थूला

त्विरिचुः।।टीका-अंगुलेर्द्दारूणि। अंगुल्यंताद् ऊर्ध्वी देशः पर्व स्यात्। दारूण्यर्थे। पंचांगुलयो
यस्य तत् पंचांगुलं दारु। अंगुलिसदृशा यस्य वंधान्यादि विन्यासपणं काष्ठमुच्यते। दारु
णि किं। पंचांगुलिर्हस्तः।टीका वितस्त्यां च प्रदेशः। अन्यो प्रदेशः प्रस्याद् ऊर्ध्वी हो। दि प्रदेशः। त्रि
प्रदेशः। नेत्रं नु सत्रे अब्रह्मव्यः। मृगो नेता अस्सो रात्रीणां तामृगानेत्रा रात्रेयः। उष्ट्र नेत्रा
।टीका-अंतर्बहिस्त्यां च विलोमन्नः। आत्यो लोमन्नः अपस्यात् अंतर्लोमः बहिर्लोमः।। टीका-अस्त्रा पि
कायाः संज्ञायां न संवा स्थूलात्। नासिकाताद् ऊर्ध्वी हरस्य च स्यात्। नासिकाया ह्योनत
चाभ्रोति। संज्ञायां नु स्थूलात्। टीका-शर्वपि द्वाच्च ज्ञायामगः। शर्वपद्माग्निमित्तात् परस्मानस्य
णः स्यात् संज्ञायां। न उगोकारव्यवधाने। क्षुरिव नासिकास्य क्षुर्णसः। खरणासः। अगः। किं। अ
गयनं। अस्थूलात्। किं। स्थूलनासिकः। खुरखराभ्यां नसः। खुरणाः। खरणाः। पक्षे अन्त्वा। खुर

८६

णासः।खरणासः।सू।उपसर्गाच्च।उपसर्गान्नासिकाया अच् नसादेशश्च।अं संज्ञायामपि।
सू।उपसर्गाद्बहुलं।उपसर्गान्निमित्तात्परस्य नसो नकारस्य णः स्याद्बहुलं।प्रणसः।उ
न्नसः।विग्रोविख्यः॥विगतानासिका अस्य विग्रः।सू।नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां
।एभ्यो हलिसक्थ्योरच् स्याद्वा।अहलः।अहलिः।असक्थः।असक्थिः।एवं दुःसुभ्यां।सू।नि
त्यमसिच् प्रजामेधयोः।नञ्दुःसुभ्यः परयोः प्रजामेधयोर्नित्यमसिच् स्यात् बहुव्रीहौ।अप्रजा
ः।दुःप्रजाः।सुप्रजाः।अमेधाः।दुर्मेधाः।सुमेधाः।नित्यग्रहणात् नंदमेधाः।अल्पमेधाः॥
।सू।धर्मादनिच्केवलात्।केवलात्पदात् यो धर्मशब्दस्तस्माद्बहुव्रीहेरनिच् स्यात्।कल्याणधर्मा
।केवलात्किं।परमः स्वो धर्मोऽस्य परमस्वधर्मः॥सू।दक्षिणेर्मा लुब्धयोगे।अयं निपात्यते।दक्षि
णे ईर्मं यस्य स दक्षिणेर्मा मृगः।व्याधेन क्षतप्रहरण इत्यर्थः।दक्षिणेर्म्मम् अन्यत्र।सू।त्रपंत्या

जानुनोर्ज्ञुः।आभ्यांपरस्यजानुशब्दस्यज्ञुरादेशःस्यात्।बहुव्रीहौ।प्रगतेजानुनीअस्यप्रज्ञुः।संज्ञुः।
।सू।ऊर्ध्वाद्विभाषा।ऊर्ध्वज्ञुः।ऊर्ध्वजानुः।ऊधसोनङ्।कुंडोध्नी।पुंसितुमहोधाः।गोगणः।।सू।धनु
षश्च।धनुरंताद्बहुव्रीहेरनङादेशःस्यात्।शार्ङ्गंधनुर्यस्यशार्ङ्गधन्वा।।सू।संज्ञायांवा।शतधन्वा।
शतधनुः।।सू।जायायानिङ्।जायांतस्यबहुव्रीहेर्निङादेशःस्यात्।।सू।लोपोव्योर्वलि।धातोरधा
तोश्चवकारयकारयोर्लोपःस्याद्वलिपरे।पुंवद्भावः।युवतीजायायस्यसयुवजानिः।लक्ष्मी
जानिः।।सू।गंधस्येदुत्पूतिसुसुरभिभ्यः।एभ्योगंधस्येकारांतादेशःस्याद्बहुव्रीहौ।उद्गंधिः।पूति
गंधिः।सुगंधिः।सुरभिगंधिः।।सू।।श्रागं[illegible]केस्येकवचनांतस्यवा।शोभनोगंधोस्यसुगंधआ
पणः।सुगंधिर्वा।।सू।अल्पाख्यायां।अल्पत्वकथनेगंधस्यत्वंवा।सूपोल्पोस्मिन्नास्ति।सूपगंधिभोज ८१
नं।घृतगंधिभोजनंवेति।ग्रंथांतरे।सूपगंधंघृतगंधं।अल्पपर्यायोगंधशब्दः।।सू।उपमानाच्च।

त्‌उपमानात्परस्य गंधस्य इत्वं वा बहुव्रीहौ । पद्मस्येव गंधोऽस्य स पद्मगंधिः । मतांतरे विकल्पः पद्मगंधः ।
॥ सू । पादस्य लोपोऽहस्त्यादिभ्यः । हस्त्यादिवर्जे उपमानात्परस्य पादस्यांतलोपः स्यात् बहुव्री
हौ । व्याघ्रस्येव पादावस्य व्याघ्रपात् । अहस्त्यादेः किं । हस्तिपादः । कुसूलपादः ॥ सू । कुंभपदी
षु च । कुंभपद्यादिषु पादस्य लोपोऽन्त्यो ङीप् च निपात्यते स्त्रियां । पादः पत् । कुंभपदी । शतपदी ।
स्त्रियां किं । कुंभपादः ॥ सू । संख्यासुपूर्वस्य । संख्यापूर्वस्य सुपूर्वस्य च पादस्यांतलोपः स्या
त् । द्विपात् सुपात् ॥ सू । वयसि दंतस्य दतृ । संख्यासुपूर्वस्य दंतस्य दतृ आदेशः स्यात् । वय
सि द्योत्ये बहुव्रीहौ । [illegible] । द्विदन् । द्विदंतौ । चतुर्दन् । चतुर्दंतौ । षष उत्वमित्युत्वं च । षोडन् ।
सुदन् । सुदती । वयसि किं । द्विदंतः करी । सुदंतो लाटः । अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च । एभ्यो
दंतस्य दतृ वा । कुड्मलाग्रदन् । कुड्मलाग्रदंतः । शुद्धदन् । शुद्धदंतः । शुभ्रदन् । शुभ्रदंतः । चक

चकारान्मुखकदन्ना। काकदन्ना। अद्रिदन्ना। अद्रिदंतः। इत्यादि॥ ७॥ ककुदस्यावस्थायांलोपः। क
कुदस्यांतलोपःस्यात्। अवस्थायांद्योत्यायांलोके। अजातककुत्। बाल इत्यर्थः। त्रिककुत्ति द्विव्यां काकु
दस्य। आत्पापरस्य ककुदांतलोपःस्यात्। उत्ककुत्। विककुत्। काककुदं तालु॥ ८॥ सुहृदुर्हृदौ
मित्रामित्रयोः॥ सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते। सुहृन्मित्रं। दुर्हृदमित्रः। अन्यत्र सुहृदयः। दु
र्हृदयः॥ ९॥ उरःप्रभृतिभ्यः कप्॥ एभ्यः कप्स्याद्बहुव्रीहौ। परत्वात्तद्धितत्वान्नकारस्य इत्त्वा। व्यू
ढोरस्कः। प्रियसर्पिष्कः। उरःसर्पिर्दधिमधुपाः॥ १०॥ इनः स्त्रियां॥ इन्नंतात्स्त्रियांकप्स्यात्। ब
हुदंडिका। बहुवाग्मिका। नद्यृतश्चेति कप्। केऽणः इति ह्रस्वे प्राप्ते॥ ११॥ न कपि॥ कपि परे अणो ह्रस्वो
न स्यात्। केऽणः। बहुलक्ष्मीकः॥ १२॥ शेषाद्विभाषा॥ अनुक्तसमासांताद्बहुव्रीहेर्वा कप्स्यात्। बहु
दंडी बहुदंडिकः॥ १३॥ आपोऽन्यतरस्यां॥ कपि आबंतस्य ह्रस्वो वा स्यात्। बहुमालः। बहुमालकः।

५८

अनावंतस्यापि कृत्स्नावेति केचित्॥ बहुसोमपाकः। बहुसोमपकः॥ ईयसश्च॥ ईयसंताद्ब
हुव्रीहेः कप्न स्यात्। बहवः श्रेयांसो यस्य स बहुश्रेयान्। याबाबकल्यः श्रेयस्यो यस्य बहुश्रेयसी पुरुषः।ब
वं दिति नाद्यः। ध्यान्वंतान्न कप् स्यात् सजायाः। श्रोतनो धातास्यासु न्याता। अन्यत्र तु खंभात्रू कः॥
॥ कः॥ सर्वनामसंख्ययोः॥ आगिन पातो बहुव्रीहेर्वाच्यः। सर्वश्वेतः। द्विशुक्लः॥ मिथोनयोः समासे संख्या
पूर्वं निपतेत्। द्व्यन्यः। अल्पीयसी पूर्वी द्वित्राः। पंचषाः। वाप्रियस्य पूर्वत्वं। गुडप्रियः।
प्रियगुडः॥ गड्वादेः परा सप्तमी॥ गडुः कंठे अस्य गडुकंठः। प्रायिकं चैतत्। बहे
गडुः। अत्र सप्तम्या अलुक्। छा॥ निष्ठा॥ निष्ठांत प्राक् प्रयोज्यो बहुव्रीहौ। विशेषण
स्य विवक्षया पूर्वत्वात् देते द्विवचनं। कृतकटः। जातिकालसुखादिभ्यः परे निष्ठा सप्त
म्यौ। सक्तुजग्धा। सार्नं गजग्धा। मासजातः। सुखजातः। प्रहरणार्थेभ्यः परे निष्ठास

त्तम्यौ। अस्त्युद्यतः। दंडपाणिः। उद्यतासिरित्यादौ प्रयोगवशात् ज्ञेयं। छ। वाहिताग्न्यादिषु।
एषु निष्ठा वा पूर्वं स्यात्। आहिताग्निः। अग्न्याहितः। जातपुत्रः। पुत्रजातः। इत्यादि। आ
कृतिगणोऽयं। समस्यमानपदार्थो यत्रान्यपदार्थस्यैकदेशः स तद्गुणसंविज्ञानो बहुव्री
हिः। लंबकर्णः। इति बहुव्रीहिः। छ।। छ। चार्थे द्वंद्वः। अनेकं सुबंतं चार्थे समस्यते स
द्वंद्वः। समुच्चयान्वाचयइतरेतरयोगसमाहाराश्चार्थाः। तत्रेश्वरं गुरुं च भजस्वेति प्र
त्येकमेकक्रियान्वितसंबंधः समुच्चयः। बटो भिक्षामट गां चानयेति क्रमेण क्रियाद्व
यसंबंधोऽन्वाचयः। अन्योन्यापेक्षयैकक्रियासंबंधः इतरेतरयोगः। संहतिः समा
हारः। तत्र समुच्चयान्वाचययोः समासो नास्ति। असामर्थ्यात्। छ। द्वंद्वे घि। द्वंद्वे घिसं
ज्ञं पूर्वं स्यात्। हरिश्च हरश्च हरिहरौ। अनेकप्राप्तावेकस्यानियमः। अनियमः

हरिगुरुहराः। हरिहरगुरवः॥ क्व। अजाद्यदंतं। अजादि अदंतं तत् द्वंद्वे पूर्वं स्यात्॥ इंद्रोग्न
ह्मो। बहुष्वनियमः। अश्वरथेंद्राः। इंद्राश्वरथाः। घ्यंताजाद्यंतयोर्मिथः समासे घ्यंतं परं। इंद्राग्नी
। इंद्रवायू तपरः किं। अश्वावृषौ वृषाश्वौ वा॥ क्व। अल्पाच्तरं। अल्पाच्तरं द्वंद्वे पूर्वं स्यात्॥ शिव
केशवौ। बहुष्वनियमः। शंखदुंदुभीवीणाः। वीणाशंखदुंदुभयः। ऋतुनक्षत्राणां समानाक्षरा
णामानुपूर्व्येण पूर्वनिपातः। हेमंतशिशिरवसंताः। कृत्तिकारोहिण्यौ। समानाक्षराणां
किं। ग्रीष्मवसंतौ। लघ्वक्षरं पूर्वं। कुशकाशाः। अभ्यर्हितं च। नारदपर्वतौ। वर्णानामानुपूर्व्येण।
ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ। संख्याया अल्पीयस्याः। द्वैवद्वंद्वे
च द्वादश॥ क्व। राजदंतादिषु परं। एषु पूर्वप्रयोगार्हं परं स्यात्॥ दंतानां राजा राजदंतः। वनस्याग्रे अग्रे
वणं। निपातनादलुक्॥ क्व। धर्मार्थौ। धर्मा। र्थौ। कामार्थौ। धर्मादिष्वनियम इष्यते। अर्थधर्मौ। अर्थकामौ।

इत्यादि॥ सू॰ जायाया जं तावदं भावो निपात्यो वा पत्यौ। जंपती। दंपती। जायापती॥ सू॰ अनुवादेच
रणानां। चरणानां द्वंद्व एकवदनुवादे गम्यमाने। कठकालापं॥ सू॰ अध्वर्युक्रतुरनपुंसकं। अ
ध्वर्युवेदस्य विहितं सोध्वर्युक्रतुः। तद्वतां द्वंद्व एकवत्। अर्काश्वमेधं। अध्वर्युक्रतुरिति किं। इ
षुवज्रौ। अनपुंसकमिति किं। राजसूयवाजपेये॥ सू॰ अध्ययनतोऽविप्रकृष्टाख्यानां। अध्य
यनेन आसन्नसंज्ञानां द्वंद्व एकवत्स्यात्। पदकक्रमकं। अध्ययनेति किं। पितापुत्रौ। आसन्नाख्या
यां किं। याज्ञिकवैयाकरणौ॥ सू॰ द्वंद्वश्च प्राणितूर्यसेनांगानां। एषां द्वंद्व एकवत्स्यात्। [illegible]पं गो। दंतो
ष्ठं। तूर्यांगा। मार्दंगिकपाणविकं। सेनांगा। रथिकाश्वारोहं। समाहारस्यैकत्वादेकत्वे सिद्धे प्राण्यं
गादीनां समाहार एव द्वंद्वः। दधिपयआदीनामितरेतरयोग एव। वृत्तमृगादीनामुभयथेत्येतदर्थ

१००

मिदं प्रकरणं॥ सू॰ जातिरप्राणिनां। प्राणिवर्ज्जजातिवाचिनां द्वंद्व एकवत्स्यात्। धानाशष्कुलि।

प्राणिनां तु । विट्शूद्राः । द्रव्यजातीनामेवैकवद्भावः । नेह । रूपरसौ । गमनाकुञ्चने । द्रव्य
विवक्षायां । बदरामलके स्तः । ६० । विशिष्टलिंगो नदी देशोऽग्रामाः । ग्रामवर्जनदीदे
शवाचिनां भिन्नलिंगानां द्वंद्व एकवत् स्यात् । गंगाशोणं । कुरुकुरुक्षेत्रं । भिन्नलिंग
नां किं । गंगायमुने । ग्रामे तु । जाम्बवविकशालूकिन्यौ । ६१ । क्षुद्रजन्तवः । क्षुद्रजन्तूनां द्वं
द्व एकवत् स्यात् । यूकालिक्षं । आनकुलात् क्षुद्रजन्तवः । ६२ । येषां च विरोधः शाश्वतिकः ।
नित्यविरोधिनां द्वंद्व एकवत् स्यात् । अहिनकुलं । अश्वमहिषं । काकोलूकं । चका
रात् पशुशकुनिद्वंद्व एव । ६३ । शूद्राणामनिरवसितानां । अबहिष्कृतानां शूद्राणां द्वं
द्व एकवत् स्यात् । रजकतन्तुवायं । बहिष्कृतानां तु । चण्डालमृतपाः । यैर्भुक्ते पात्रे
संस्कारेणापि शुध्यति ते बहिष्कृताः । ६४ । गवाश्वप्रभृतीनि च । यथोच्चारितान्येतानि कृ

सैते कृत्वानिसाधूनि स्युः। गवाश्वं दासीदासं इत्यादि॥१२॥ विभाषा वृक्षमृगतृणधान्यव्यंजन
पशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां। एषां द्वंद्व एकवत्स्यात् वा। वृक्षादौ विशेषाणामेव
ग्रहणं। ताशोकं तशोकाः। रुरवश्वपृषता। श्वरुरुपृषतं। रुरुपृषताः। कुशकाशं॥
व्रीहियवं। दधिघृतं। गोमहिषं शुकबकं। अश्ववडवं। पूर्वापरं। अधरोत्तरं पक्षे कुशका
शौ व्रीहियवौ गोमहिषावित्यादि॥१३॥ फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्य
तृणानां बहुप्रकृतिरेव द्वंद्व एकवत्स्यात्। बदराणि चामलकानि च बदरामलकं। द्विवचने
तु बदरामलके। रथिकाश्वारोहावित्यादि॥१४॥ विप्रतिषिद्धं चानधिकरणवाचि। अद्रव्य
वाचिनां विप्रतिषिद्धानां द्वंद्व एकवत्स्याद्वा। शीतोष्णं। शीतोष्णे। विरुद्धं किं। कामक्रो
धौ। द्रव्ये तु शीतोष्णे उदके॥१५॥ न दधिपयआदीनि। एतानि नैकवत्स्युः। दधिपयसी॥

१०१

इध्माबर्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसे। इत्यादि। ॥छ॥ आनङ् ऋतो द्वंद्वे। विद्यायो
निसंबंधवाचिनां ऋदंतानां द्वंद्वे पूर्वपदस्यानङ् स्यात्। होतापोतारौ। मातापितरौ। पुत्र इत्य
नुवर्त्तते। पितापुत्रौ। मातापुत्रौ। ॥छ॥ देवताद्वंद्वे च। इह पूर्वपदस्यानङ् स्यात्। मित्रावरुणौ।
उक्तयत्र वायोः प्रतिषेधः। अग्निवायू। वाय्वग्नी। एकहविर्भागित्वे द्वंद्वस्य। ब्रह्मप्रजापती॥
इत्यादावप्रतिषेधेऽपि नानङ्। ईदग्नेः सोमवरुणयोः। अनयोर्द्वंद्वे अग्नेरीकारादेशः स्या
त्। अग्नेः स्तुत्स्तोमसोमाः। अग्नेः परेषामेषां सस्य षः स्यात्। समासे। अग्निष्टुत्। अग्निष्टो
मः। अग्नीषोमौ। अग्नेर्दीर्घात्सोमस्यैष्यते नेह। अग्निसोमौ माणवकौ। अग्नीवरुणौ। ॥छ॥
इद्वृद्धौ। वृद्धौ परपदे अग्नेरिकारादेशः स्यात्। आग्निमारुतं कर्म। आग्निवारुणीमनड्वा
हीं। विष्णौ न। देवताद्वंद्वे चेत्यानङ्। आग्नावैष्णवं चरुं। ॥छ॥ दिवो द्यावा। द्यावा स्तुमीजने

यन्तौ। छ। मातरपितरावुदीचां। मातरपितरौ। उदीचां किं। मातापितरौ। छ। द्वंद्वाच्चुदषहांता
समाहारे। चवर्गांताद्दषहांताच्च द्वंद्वाट्टच् स्यात् समासांतः समाहारे। छ। त्वक् च स्रक् च तयोः स
माहारः। वाक्त्वचं। श्रीस्रजं। शमीदृषदं। वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्शरदौ।
छ। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः। यूना सहवचने गोत्रं शिष्यते। गोत्रयुवप्र
त्ययमात्रकृतं वैरूप्यं चेत्तयोः। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। यूना किं। गार्ग्यगर्गौ। तल्लक्ष
णः किं। गार्ग्यवात्स्यायनौ। छ। स्त्री पुंवच्च। यूना सहवचने स्त्री वृद्धा शिष्यते सा च पुंवद्
स्यात्। तल्लक्षणमेव वैरूप्यं चेत्। गार्गी च गार्ग्यायणश्च गार्ग्यौ। छ। पुमान् स्त्रिया। स्त्रिया
सहोक्तौ पुमान् शिष्यते। स्त्रीपुंसलक्षणश्चेदेव विशेषः। ब्राह्मणश्च ब्राह्मणी च ब्राह्म
णौ। तल्लक्षणः किं। कुक्कुटमयूर्यौ। छ। भ्रातृपुत्रौ स्वसृदुहितृभ्यां। स्वसा सहोक्तौ १०२

भ्राता दुहित्रा सहोक्तौ पुत्रः शिष्यते। भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ॥ नपुं
सकमनपुंसकेनैकवच्चास्यान्यतरस्यां। अक्लीबेन सहोक्तौ क्लीबं शिष्यते एकवच्चास्य वा स्या
त् लिंगविशेष एव चेत्। शुक्लः कंबलः। शुक्ला द्विपटी। शुक्लं वस्त्रं तदिदं शुक्लं। तानीमानि
शुक्लानि॥ पिता मात्रा॥ मात्रा सहोक्तौ पिता वा शिष्यते। माता च पिता च पितरौ। मातापितरौ
वा॥ श्वशुरः श्वश्र्वा॥ श्वश्रूश्च श्वशुरश्च श्वशुरौ। श्वश्रूश्वशुरौ वा॥ त्यदादीनि सर्वैर्नित्यं॥ स
र्वैः सहोक्तौ त्यदादीनि शिष्यते नित्यं। स च देवदत्तश्च तौ। त्यदादीनां मिथः सहोक्तौ परं तच्छिष्य
त इति वाच्यं। स च यश्च यौ। ग्राम्यपशुसंघेष्वतरुणेषु स्त्री॥ ग्राम्यपशूनां संघेषु सहोक्तौ स्त्री शिष्य
ते न तरुणेषु। गाव इमाः। अजा इमाः। ग्राम्येति किं। रुरव इमे। पशुषु किं। ब्राह्मणा इमे। संघेषु किं॥
वत्सा इमे। अनेकशफेष्विति वाच्यं॥ नेह। अश्वा इमाः॥ ॥इति द्वंद्वः॥ ॥ऋक्पूरब्धूःपथामानक्षे॥ एषा
मप्रत्ययः स्यात् समासान्तः। धुरक्षा नन्ते च। अर्द्धर्चः॥ क्ली अर्द्धर्चाः पुंसि च। अनृचो बह्वृचो अध्येत

र्यवानेहा। अन्तकृष्णामा बहुकृष्णं। विष्णुपुरं। विमलापसरः। ई चैतरुपसर्गेभ्योप ईत्। एभ्यो

पोकारस्य ईः स्यात्। द्विगता आपो यस्मिन् द्वीपं। अन्तरीपं। प्रतीपं। समीपं। क्वचिन्न स

मासान्तो देवयजनं। अब्वर्णान्नित्यमिति केचित्॥ छ॥ ऊदनो देशे। अनोः परस्य अपोका

रस्य ऊः स्यात्। अनूपो देशः। राजधुरा। अक्षेषु। अक्षधूः। दृढधूः। अक्षः सखिपथो। रम्यपथो

देशः। महापथः। त्रिपथः। चतुष्पथं। उपपथं॥ छ॥ अच्प्रत्यन्ववपूर्वात्सामलोम्नः। एभ्यः

परात्सामलोम्नः स्यात्। अच् स्यात् समासे। प्रतिसामं। अनुसामं। अवसामं। एवं प्रतिलो

मादि। कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेर् अजिष्यते। कृष्णभूमः। उदग्भूमः। पाण्डुभूमः। द्वि

भूमः। त्रिभूमः ग्रामादः॥ छ॥ संख्याया नदीगोदावरीभ्यां च। पंचनदं। सप्तगोदावरं। अ

न्यत्रापीष्यते। पद्मनाभः। ऊर्णनाभः। दीर्घरात्रः। पर्यरात्रः॥ छ॥ अक्ष्णोऽदर्शनात्। अचक्षुःपर्या १०२

यादक्ष्णोच् स्यात् समासान्तः। गवामक्षीव गवाक्षः। चक्षुषि तु विप्राक्षि॥ अचतुरेति सूत्रे

णाजंतां पंचविंशतिर्न्निपात्यंते। आद्यास्त्रयो बहुव्रीहयः। अपगतानि चत्वारि अस्य चतुरः।
विचतुरः। सुचतुरः। त्र्युपाभ्यां चतुरोऽजिष्यते। त्रिचतुराः। उपचतुराः। तत एकादश
द्वंद्वाः। स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सामे। वाङ्मनसे। अक्षिभ्रुवं। दारगवं। ऊर्वष्ठीवा नि
पातनाद्दिलोपः। पदष्ठीवं निपातनात्पद्भावः। नक्तंदिवं। रात्रिंदिवं। अहर्दिवं। अहन्य
हनीत्यर्थः। रजसा सकलमस्तीति सरजसं। साकल्येऽव्ययीभावः। निश्चितं श्रेयो निःश्रेयसमिति
कर्मधारयः। पुरुषस्य आयुः पुरुषायुषं। ततो द्विगुः। द्व्यायुषं। त्र्यायुषं। ततो द्वंद्वः। ऋग्यजु
षं। ततस्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धोक्षः। शुनः समीपं उपशुनं। गोष्ठेश्वा गोष्ठश्वः।
।छ। ब्रह्महस्तिभ्यां वर्चसः। ब्रह्मवर्चसं। हस्तिवर्चसं। पल्यराजभ्यां च। पल्यवर्चसं। राजवर्चसं।
।छ। अवसमंधेभ्यस्तमसः। एभ्यस्तमसोऽच् स्यात्। अवतमसं। संतमसं। अंधतमसं।छ।
श्वसो वसीयःश्रेयसः। श्वोवसीयसं। श्वःश्रेयसं। मुत्तार्थ वितौ॥ छ। अन्ववतप्ताद्रहसः। अ

नुरहसं। अवरहसं। तप्तरहसं॥ ५॥ प्रतेरुरसः सप्तमीस्थात्। प्रतेः परात् सप्तमीस्थात्
उरसो ऽच् स्यात्। उरसि प्रवर्त्तते प्रत्युरसं। विभक्त्यर्थे ऽव्ययीभावः॥ ६॥ अनुगवमायामे।
एतं निपात्यते दीर्घत्वे। अनुगवं यानं। दीर्घमित्यर्थः। यस्य चायाम इति समासः॥ ७॥ उप
सर्गाद्ध्वनः। प्रगतो ऽध्वानं। प्राध्वो रथः॥ ८॥ न पूजनात्। पूजनात्परेभ्यः समासांतप्रत्ययान स्युः।
सुराजा। अतिराजा। स्वतिभ्यामेव। नेह। परमराजः। पूजनादिति किं। गामतिक्रांतो ऽतिग
वः। बहुव्रीहौ सक्थ्यक्ष्णोर्न निषेधः। सुसक्थः। स्वक्षः। किमः क्षेपे। क्षेपार्थात् किमः परस्य
समासांतो न स्यात्। किंराजा॥ ९॥ नञस्तत्पुरुषात्। नञः परस्तत्पुरुषात्समासांतो न स्या
त्। अराजा। असखा। तत्पुरुषात् किं। अनृचो माणवकः। अधुरं॥ १०॥ पथो विभाषा। नञः परस्मा
त्पथो वा समासांतः। अपथं। अपंथाः। तत्पुरुषादित्येव। अपथा देशाः। अपथं वर्त्तते॥ ११॥
लुंपेदवश्यमः। कृत्ये तुं काममनसोरपि। समो वा हिततयोः। मांसस्य पचि युड्घञोः।

१०६

ज्मभारहारवीवधगाहेषु वा। उत्तरपदे उदकस्योदादेशः स्यात्। उदमंथः उदकमं
थः इत्यादि॥ इको ह्रस्वोऽङ्यो गालवस्य॥ अङ्यन्तस्य इको ह्रस्वो वा स्यात्। ग्रामणि
पुत्रः ग्रामणीपुत्रः। अङ्यन्तस्य तु गार्गीपुत्रः॥ ष्यङः संप्रसारणं पुत्रपत्योस्तत्पु
षे॥ ष्यङः तस्य संप्रसारणं स्यात् पुत्रपत्योः परतस्तत्पुरुषे। ह्वदृ (?) पक्षौ॥ ह्वासंप्र
सारणस्यापसंप्रसारणात् तस्य दीर्घः स्यात्। कौमुदगंध्याः पुत्रः कौमुदगंधीपुत्रः।
कौमुदगंधीपुत्रः॥ व्यवस्थितविभाषयाऽकृतैव (?)॥ एक तद्धिते च॥ एकस्य का
ह्रस्वः स्यात् तद्धिते उत्तरपदे च परे। एकस्याः ताव (?) एकता। एकक्षीरं॥ इष्टकेषी
कामालानां चिततूलभारिषु॥ इष्टकादीनां चितादौ परे पदे यथाक्रमं ह्रस्वः स्या
त्

१०५

अवश्यसेव्यः। गंतुकामः। गंतुमनाः। सहितः संहितः। सततः संततः। मांसपचनं मांस्य-
पचनं। मांसपाकः मांस्पाकः। काममनसोः समो तल्लोप इति केचित्। सकामः सम-
नाः। ६॥ उदकस्योदः संज्ञायां। उदकस्योदादेशः स्यात् उत्तरपदसंज्ञायां। उदमेघः।
उदवाहः। उत्तरपदस्यापि लोहितादः। क्षीरोदः। ७॥ पेषंवासवाहनधिषु च।
एषूदकस्योद। उदपेषं पिनष्टि। णमुल् तः। उदवासः। उदवाहनः। उदधिः। कित्वपा-
तः। ८॥ एकहलादौ पूरयितव्येऽन्यतरस्यां। असंयुक्तहलादौ परपदे उदादेशो वा स्यात्।
परपदं चेत्पूरयितव्यार्थं। उदकुंभः। उदपात्रं। उदककुंभः। उदकपात्रं। एकह-
लादौ किं। उदकस्थाली। पूरयितव्यं किं। उदकपर्वतः। ९॥ मंथौदनसक्तुबिंदुवे